अस्य श्रीविष्णुदुर्गामन्त्रस्य विष्णुऋषिः अनुष्टुप् छन्दः । विष्णुदुर्गा देवता। दुं बीजं हुं शक्तिः फट् कीलकम्। मम विष्णुदुर्गा प्रसादसिद्ध्यर्थे जपे विनियोगः ।। मूलेन न्यास,।। सौवर्णाम्बुजमध्यगामिति ध्यानम् ।। ओं नमो भगवति वैष्णवदुर्गे दुर्गार्ति नाशिनि एह्येहि आगच्छागच्छ हन हन दह दह पच पच हुं फट् स्वाहा ।। इति ।।

पूर्व कुम्भे हनूमन्तं दक्षिणे गरुडं यजेत् ।
पश्चिमे भद्रकालीं च ह्युत्तरे भैरवं यजेत् ।।
तत्पुरः पङ्क्तिरूपेण पञ्चपुत्तालिका न्यसेत् ।
पार्थिवं भूतराजानं रक्ते वह्न्याश्रयं पतिम् ।।
धूम्रे वाय्वाश्रयं भूतं कृष्णे चाकाशसंश्रयम् ।
नारायणास्त्रमाग्नेये ब्रह्मास्त्रं नैर्ऋते यजेत् ।।
वायव्यास्त्रं वायुकोणे चाग्नेयास्त्रं तथैश्वरे ।
खड्गं सुदर्शनं चक्रं सर्वावरणसंयुतम् ।
आवाह्याभ्यर्च्य देवेशं नैवेद्यं विविधं चरेत् ।
ततः प्रसन्नः पूजान्ते बलिकर्म समारभेत् ।
पुरः करबलिं स्थाप्य चर्वणेनाकृतिं क्रियात् ।।
पारसीकं च तन्मध्ये दण्डदीपं प्रतिक्षिपेत् ।
तत्र सङ्कोचयेद्भूतान् अष्टधातु समाश्रयान् ।।
अङ्गावयवसंस्थांश्च नीराज्य करवर्तिका ।
स्थापयेत्तत्र पुत्तल्यां देहं व्याप्यावरोपयेत् ।।

त्वक्चर्म मांसमेदोऽस्थिरक्तशुक्रान्तसंश्रितान्
अन्यावयव संस्थांश्च दशधा चावरोपयेत् ।।

ततो ग्रहस्य प्राणप्रतिष्ठां कृत्वा न्यस्तग्रहाय नमः इति नीराज्य प्रतिमाया दशवास्थापयेत् ।।

मालया दण्डवर्तीश्च नीराज्यात्र प्रतिक्षिपेत् ।
पञ्च पञ्च द्वयं पार्श्वे तं व्याप्यात्रावरोपयेत् ।।

पुनः करबलिं गृह्य मन्त्रेणानेन पार्वति ।
तं च त्रिवारं नीराज्य दक्षिणे स्थापयेद्बहिः ।।

ज्वलद्वर्तित्रयं क्षारतोये न्यस्यावरोप्य च ।
क्षारे सशब्दं निक्षिप्य दक्षिणे स्थापयेच्चतत् ।।

भस्मस्नान ततः कृत्वा देह रक्षां विधाय च ।
बलिपत्राणि सर्वाणि निक्षिपेच्च चतुष्पथे ।।

एवं कृते महादेवि देवगन्धर्वविग्रहाः ।
ब्रह्मराक्षसवेताला यान्ति प्रेता विसृज्यतम् ।।

अल्पे तु करबल्येव कार्येदुक्तमार्गतः ।
बलि देवा हृता भूता धावन्त्यत्र न संशयः ।।

बलिनीराजनमन्त्रः—भूतानि सर्वाणि वसन्ति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम् । अन्यत्र वासं परिकल्पयन्तु रक्षांसि मामत्र नमोऽस्तु तेभ्यः ।। इति मालामन्त्रः ।। क्ष्रां क्ष्रूं । ओं नमो भगवति नृसिंह वदने महागभीरे महानारसिंहि परकर्मविध्वंसिनि परमन्त्रोच्छेदिनि परगोप्य (गात्र) भेदिनि परमन्त्रपरतन्त्र परयन्त्राणि संहर संहर सर्वं विच्छिद विच्छिद सर्वंभूतान् भिन्धि भिन्धि सर्वग्रहान् बन्ध बन्ध सर्वव्याधीन् निकृन्तय निकृन्तय सर्वदुष्टान् भक्षय भक्षय । सर्व प्राणि वर्गान् भीषय सर्वं वज्रान् स्फोटय स्फोटय सर्वं मन्त्रानाकर्षयाकर्षय । सर्वं शक्ति राकर्षया कर्षय ज्वालाजिह्वे लिह लिह विदारय विदारय खस खस श्रीं हुं फट् स्वाहा ।। इति प्रोक्तं महादेवि बलिकर्म शुभावहम् । अस्मिन् कृते महाभूता विनश्यन्ति न संशय ।।
इति क्रमदीपिकायां नृसिंहकल्पे प्रथमपरिच्छेदः ।।

ओं बीजं प्राणश्च शक्तिश्च दृष्टिर्वश्यादिकं च वा ।
गायत्री मन्त्रयन्त्राणि प्राणस्थापनमेव च ।।
भूतदिक्पाल बीजानि यन्त्रस्याङ्गानि वै दश ।
त्रिकोणमादौ संलिख्य तन्मध्ये क्ष्रां समालिखेत् ।।
साध्येन परितो वेष्ट्य यन्त्रन्यायं समालिखेत् ।

इति अघोरनृसिंहकल्पे भूतनिग्रह प्रकारः सम्पूर्णः ।।

बीजं प्राणः यं शक्तिः ह्रीं इं ईं वश्यम् । ओं गायत्री तीक्ष्णदंष्ट्राय विद्महे वज्रनखाय धीमहि । तन्नो नृसिंहः प्रचोदयात् ।। मूलमन्त्रः—पूजा यन्त्रं प्राणप्रतिष्ठा ।।

अघोरास्त्रसहस्राक्षरीमन्त्रः

ओं…ह्ल्ूं ह्लौं क्ष्मौं क्ष्म्रौं मं गः। स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतर तनुरूप तनुरूप घोर घोर शर्व शर्व चट चट प्रचट प्रचट प्र प्र प्रप्र पुरदहनाय सूर्याग्नि त्रिणयन शताष्ट भुजभीम गजचर्माम्बरधर युगान्ताग्नि ज्वालादीप्त प्रभाव प्रकाश त त राट्टहास व्याघ्रचर्म परिधानाय क क क क ह ह ह ह शूल खटवाङ्गपाश कपालमुष्टि चक्र तोमर परशु नाग भिण्डिपाल शंख खेटक टङ्क गदा शर शक्ति कुन्तमुसल गदाधर कह कह वम वम घातय घातय क्रूर चण्ड तीव्र ज्वालादंष्ट्राय कृष्णसर्प यज्ञोपवीताय हुं हुं हुं हुं हुं काकरूपाय यं यं यं यं उच्चाटनाय उच्चाटनाय उच्चाटनाय उच्चाटनाय फट् फट् फट् फट् विद्वेषण विद्वेषण लं लं लं लं स्तम्भाय स्तम्भरूयाय ह्लां ह्लां ह्लां ह्लां घ्रां घ्रां घ्रां घ्रां ठं ठं ठं ठं कालोल्का रुद्र भैरव। तुंट तुंट डि डि डि डि त त त त ह्लें ह्लें ह्लें ह्लें दह दह त्र्यम्बकं यं यं यं यं घोर घोर घोर घोर हुं हुं हुं हुं कालरूपाय तु तु तु तु तु तु तु त्वरित मद्राटं धूम्र धूम्र धूम्र धूम्र भीमाय भीतिहराय तुं तुं तुं तुं मरणकारणाय म्रें म्रें म्रें म्रें फट् फट् फट्कर कामाय ह्लीं ह्लीं ह्लीं ह्लीं नाद नाद नः नः नः नः दुः दुः दुः दुः हां हां हां हां हिं हिं हिं हिं एहि एहि एहि एहि य्रौं य्रौं य्रौं य्रौं झ्रं झ्रं झ्रं झ्रं ह्ल्ूं ह्ल्ूं ह्ल्ूं ह्ल्ूं ह्लं ह्लं ह्लं ह्लं ह्लौं ह्लौं ह्लौं ह्लौं क्षं क्षं क्षं क्षं क्षां क्षां क्षां क्षां क्ष्ं क्ष्ं क्ष्ं क्ष्ं ह्ल्यौं ह्ल्यौं ह्ल्यौं ह्ल्यौं चण्ड चण्ड प्रचण्ड प्रचण्ड क्रोध क्रोध ज्वल ज्वल प्रज्वल प्रज्वल ज्वालादीप्त ज्वालादीप्त भीम भीम तीव्र तीव्र उग्र उग्र वज्र वज्र अघोर अघोर ग्रस ग्रस वल्ग वल्ग विजृम्भ घोष घोष हठ हठ मह मह स्थूलय स्थूलय महत्पर महत्तर क्षौं क्षौं क्षौं क्षौं छातन छातन (भावन भावन) गभन गभन शि शि शि शि वेल्लु वेल्लु वेल्लु वेल्लु हिं हिं हिं हिं हें हें हें हें भीषण भैरव भीम वीर उग्र वीर उग्र भयावह भयावह घोर घोरतर नादमूर्तिरूपाय रूप रूप घोराय घोराय हुं अघोरास्त्राय अघोरास्त्राय फ्रें फ्रें फ्रें फ्रें हुं फट् हुं फट् हंस हंसः॥ ह्ल्यौं ह्ल्यौं प्रविश प्रविश प्रविश आविश विलस विलस हन हन ह्ल्ूं हुं फट्। रिपु राष्ट्र सेना गजाश्वरथ सैन्यं घातय घातय घातय घातय विदारय विदारय विदारय विदारय भीषय भीषय भीषय भीषय कम्पय कम्पय कम्पय कम्पय क्षोभय क्षोभय क्षोभय क्षोभय। दह दह दह दह त्रासय त्रासय त्रासय त्रासय त्वरित त्वरित बन्धय बन्धय अनन्तय अनन्तय शोषय शोषय मूकय मूकय मूलय मूलय पच पच पच पच भक्षय भक्षय भक्षय भक्षय उन्मूलय उन्मूलय मर्दय मर्दय विद्रावय विद्रावय ज्वर ज्वर धूम धूम निधन निधन नाशय नाशय ह्ल्ूं ह्ल्ूं ह्ल्ूं ह्ल्ूं प्र प्र प्र प्र मन्त्र मन्त्र फ्रें फ्रें फ्रें फ्रें हें हें हें हें कहि कहि उत्पाटय उत्पाटय मारय मारय हुं फट्

हुं फट् । अघोरेभ्यो तां तां तां तां अथ घोरेभ्यो ह्लें ह्लें ह्लें ह्लें घोरघोरतरेभ्यश्च हां हां हें हें शर्वत : शर्वतः ठं ठं ठं ठं सर्वेभ्यो ह्लें ह्लं नमस्ते ह्लैं ह्लैं रुद्ररूपेभ्यो मुञ्च मुञ्च । प्रमुञ्च प्रमुञ्च ।फोट स्फोट तड तड हुं फट् हुं फट् हुं फट् हुं फट् । त्र त्र त्र त्र हुं फट् हुं फट् हुं फट् ॥

एतन्मन्त्रसहस्रार्णं हेम सम्पादिता बुधैः ।
पराजिता शत्रुसेना विशीर्णा नश्यति ध्रुवम् ॥
विना पुरश्चरं नन्दिन् न च होमं न चार्चनम् ।
सकृदावृत्तिमात्रेण समीहितविधायिनी ॥

यन्मन्त्राक्षर लाञ्छितापधनवन्मर्त्याश्च वज्रार्चिषा भूतप्रेतपिशाचकाः प्रतिहता निर्घातवाता इव ।उत्पन्नाश्च भवन्ति सर्वदुरित प्रोच्चाटनोत्पादकं वन्देऽभीष्टफलाप्तियन्त्रकमलेऽघोरास्त्रमस्त्रेश्वरम् ॥

अघोरस्तवः

सकल भुवननाथं सर्वदं सर्ववन्द्यं
सहमनु मनुनाथं पूजयित्वा सशक्तिम् ।
परमशिवमघोरास्त्राख्य मन्त्राधिराजं
परिमितविषयाभिर्वाग्भिरभ्यर्चयामः ॥
यत्पाशसंहृतिषु पाशुपतं महास्त्रं
ग्रन्थिप्रभेदनविधौ क्षुरिकास्त्रमाहुः ।
विघ्नस्रुतौ च स(श)कलीकरणेशिवास्त्रं
वन्दे तदस्त्रमहमीशमघोर संज्ञम् ॥
यन्त्रे बिभर्ति निजमूर्धनि मन्त्रचक्रं
यो वा विभर्त्यवयवेषु तदक्षराणि ।
हेयं निरस्य निखिलग्रह भूतरोगान्
जित्वास्त्रनायकरिपूनति वृद्धिमेति ॥
वज्रं शक्ति दण्ड खड्गाहिपाशान्
वायोरस्त्रं सा गदा च त्रिशूलम् ।
पद्मं चक्रं साधयन्ते स्वकृत्यं
लब्धाज्ञान्ते दिग्भृतामायुधानि ॥
न भवति विषपीडा नारिपीडा न चाधि-
र्नखलु निखिलरोगानापि भूतग्रहार्तिः ।
न धनहरण भीतिर्नाभिचारस्य तेषां
सकृदपि भुवने त्वां येऽस्त्रराजं स्मरन्ते ॥
मन्त्री जपाकुसुम सन्निभभीममूर्तिं
त्वां घोरमूर्ध्नि परिपिङ्गलकेशपङ्क्तिम् ।
दंष्ट्राकरालवदनं तडिदाभजम्थम्
व्यात्ताननं रवि शशि ज्वलनोग्र नेत्रम् ॥
नागेन्द्र भूषण कपाल कृतांत माला-
शोभान्वितं भ्रुकुटि भङ्गकरालवक्त्रम् ।
धूम्राम्बरं मुखर नूपुरमष्टबाहुं
धूयन् प्रसिध्यति झणात्क्रणकिङ्कणीकम् ॥
त्वां दक्षिणैः करतलै रसि शूलमूल-
शक्ति डमड्डमरुकं च करैर्दधानम् ।

खेटं त्रिशूल नृकपाल सुरेन्द्रशस्त्रा-
ण्यारब्धयात्रमरिमर्दनमाश्रितोऽस्मि ॥
कर्ण द्वये करयुगे भुजयोश्च युग्मे
पार्श्वद्वये पदयुगे कटिमण्डले च ।
कुक्षौ गले शिरसि नाथ चतुर्दशाहीन्
तत्तद्विभूषणकृतात्मतनून् विभर्षि ॥

वामे शूलदले स्थितस्तव हरिः तानील रुद्रः पुनः मध्ये दक्षिणतो विधिस्सु-ललते गौरी गुहः कुम्भके। दण्डाग्रे गणनायको दिनकरो दण्डस्य मूले स्मर-स्तेनाघाहिगदग्रहोन्मदरिपून् अन्त्रे शनिर्नाशियः ॥

त्वां सात्विकं धवलरूपमपास्य मोक्षं
सम्प्राप्नुवन्ति मनुजास्सुखसन्निविष्टम् ।
आरक्तवर्ण मद राजसमुद्धताङ्ग-
माराधयन्ति सकलाभिमतार्थसिद्धिम् ॥
शत्रुक्षयाय सकलाभय नाशनाय
सर्वोपसर्गहृतये च तवातिरौद्रम् ।
कृष्णं कृपानिलय तामसमेव शस्तम्
यानोद्यतं यतिवराः कथयन्ति रूपम् ॥
यद्वा डमड्डमरुकानि पिशाचशूल-
मूलानि दक्षिणकरैरपरैः कपालम् ।
तां खेटकेन वरघण्टिकया च शूल-
मध्यंदधानमहमष्टभुजं नमामि ॥
आकर्षणे निखिलरोगहृतौ रिपूणां
स्तम्भे वशीकरण मोहन दीपनेषु ।
(युद्धो ?) यात्रोद्यतं तव वपु स्तदिदंशुभीमं
स्मृत्वोग्रदंष्ट्रमपरेण फलं लभन्ते ॥
कृष्णप्रभं त्रिनयनं त्रिभुजं त्रिपादं
भीमं महाशनिरवं विकटाट्टहासम् ।
त्वां सूचिमुष्टि हन भैरवि भूषिताङ्गं
धूयन्ति धावनपरं रिपुमारणादौ ॥
त्वां षड्भुजं त्रिणयनं शशिकान्तरूपं
पद्मानन विकृत भूषणमूर्ध्वकेशम् ।
वामे कपालधनुषी दधतं सखेटं
शूलं शरं च परतः प्रणतोऽस्मि सासिम् ॥

व्याधावति प्रमथने सति भूमिकम्पे
दाहे दिशां प्रचुर वृष्टिषु चण्डवाते ।
पापक्षये सकल वृद्धिषु शान्तिरौद्री
भीतौ च देव तव रूपमिदं स्मरन्ति ।।
सजलघन घनाभं भीमदंष्ट्रं त्रिणेत्रं
भुजगधरमघोरं रक्तवस्त्राङ्ग रागम् ।
परशुडमरुखङ्गान् खेटकं बाणचापौ
त्रिशिखनरकपाले बिभ्रतं भावयामि ।।

शूलं मूलं पिशाचं शरमसिसृणियुक् टङ्कयुग्भिण्डिपालं वज्रं तत्सूलमध्रं डमरुकमपरैर्घण्टिका चापखेटैः। पाशं चक्रं च दण्डं भुजगमनलकं दक्षिणै-र्बाहुदण्डैर्मध्ये त्वां विद्युदाभं विजयदमनिशं घोरनाथं भजामः ।।

(ते) केऽप्यष्टकाधिक सहस्रकरंविदुस्त्वा-
मन्येऽपिचाष्टशतहस्त मतर्क्यवेषम् ।
केचिद् द्विपञ्चकरमष्टभुजं परेऽपि
ऊचुश्चतुर्भुजयुतं कतिचित् द्विबाहुम् ।।
केचिद्वदन्ति धृत षोडशबाहुदण्ड-
मन्येपुनर्द्विन व संख्यनकारलिङ्गम् ।
त्वां सर्वतः प्रसृतपाणिपदं तु शैवं
तेजस्सुदुस्सहतरं वयमामनामः ।।
त्वां बाहु मूलवलयीकृत तक्षकाहिं
तन्मध्यवेष्टित महादृढपूर्वपद्मम् ।
पादाब्जसन्धिकुलकं करपद्म शोभं
दण्डे कटीघटित वासुकि मेखलाङ्कम् ।।
त्वां शंखपालभुजगेन्द्रकृतोपवीतं
जानुद्वयस्फुरदनन्त महोरगेन्द्रम् ।
लूतादिवृश्चिकविराजित राजिताङ्गं
कर्कोटकाहिपरिभूषित कण्ठभागम् ।।
त्वां प्रस्फुरच्छिखिनिभोर्ध्वकचं स्फुरन्तं
घोराननं विकृतघोरतराहि भूषम् ।
वन्दामहे वरतनुं तव रूपशोभं
वक्षोलसच्चटचटत्तव रुण्डमालाम् ।।
आम्रेडित प्रयुत संख्य तटित्कृतान्धे
मालाधरं कहकहा रव भोगि भूषम् ।

भूयो वमज्ज्वलनदीप्त ललाटनेत्रं
त्वं हुङ्कृतेन वम घातय घातयारीन् ॥
चक्रोद्धतव्रणतपट्कृतसम्पुटं ते
मन्त्रोत्तमं जपति यस्समम‌ङ्गमन्त्रैः ।
तस्मात्पठन्तु सुशतैः किमिहाल्पसारैः
आयातमिष्टमनिशं त्वयि सिद्धिमेति ॥

यः पञ्चषड्वेद दशाष्टयुग्मै-
र्वर्णैर्मनूत्थैः परिकल्पिताङ्गः ।
मुष्ट्यादिक बीजसशक्ति ··· ल-
युक्त्यादि सञ्चिन्त्य जपेत् सधन्यः ॥

यो मस्तकेऽलिकतले नयनद्वये च
मध्ये भ्रुवोस्तव मनोरिह नासिकायाम् ।
कर्ण द्वये हनुयुगे द्विजपङ्क्ति युग्मे
कण्ठेंऽसयोश्च जठरे स्तनयोः क्रमेण ॥

वर्णैर्निवेशयति वक्षसि नाभिदेशे
वाहु प्रकोष्ठ तलपाणिषु वामतश्च ।
स्फिग्ज्यूरु जानु तलतश्चरणेषु तद्व-
त्पायौ सलिङ्गवृषणें च तमांगजेस्वे ॥

पार्श्वद्वये हृदि च तालुनि साधकेन्द्रम्
पूजाविधौ जपविधौ च सुसम्प्रदायः ।
········· स्यसि निखिलार्तिमनेकसौख्या-
न्यासाधयत्यनिमिषैरपि पूज्यमानः ॥

त्वां शेष क्लृप्त वलयाङ्कित पाणिपद्मं
कर्कोटकाहि पति भूषित वामशोभम् ।
वक्षस्थलाभरण तक्षक नागशोभं
पद्माख्य नागपतिकल्पित हारभूषम् ॥

सुश्वेतपद्म परिक्लृप्तललाट शोभं
मध्याङ्गलग्नकुलिकोदर बन्धनागम् ।
केचित्कटी घटित भूषित शंखपालं
कर्णावतंस वरवासुकि मामनन्ति ॥

चर्मासि चापशर वज्रपरश्वथाङ्ग-
शूलादिमध्यसृणि दण्डधरैश्च हस्तैः ।
पञ्चाननं धवलदंष्ट्र मगाधनेत्रं
त्वामञ्जनाभमति भीषण माश्रयामः ॥

············रभी वर परश्वथ कृष्णसार-
युक्तैश्चतुर्भिरभिशोभित वर्णनैश्च ।
त्वां पूजयन्निह सहस्रदलाब्जसंस्थं
वाञ्छां प्रदद्दश························ ॥
काल्याद्याभिः परिवृततनुं शक्तिभिर्दिग्गताभि-
स्तन्मध्यस्थैः परिचिततनुं भीषणाद्यैश्च रन्ध्रैः ।
ब्राह्म्याद्याभिर्दिशि दिशि तनुं मा···········
············पति सुमति भूतले यस्सधन्यः ॥

कृत्वा चक्रं रजोभिस्तव तदनुगुणैः कर्णि काकेसराढ्यं मध्ये च द्वादशारं धृतनियमविधिः षोडश ··· बाह्ये । मध्ये त्वां पूजयित्वा दिशि दिशि परितः केसरेष्वष्ट शक्तीरिच्छादीर्द्वादशारेष्वथ यजति महास्त्राणि चत्वारि दिक्षु ॥ शेषारेष्वष्टरुद्रान्विदिगुदि·····यान् भीषणा भीषणादीन् बाह्येऽस्त्रैरातमदिक्स्थैस्सह कुलिशमुखैः मौतिकादीनि चाष्टौ । तस्याधिव्याधिनाशस्सकलमभिमतं शत्रुनाशश्च सद्यः शान्ति : पुष्टि ···सुखमपरिमितं क्षेत्रसम्पत्तिरन्ते ॥ यस्त्वां युद्धोद्यताङ्गं यजति कृतमतिर्भास्कराद्यैर्गणेशै क्षेत्रेशैः कोणसंधिस्त्रि··············दाज्ञानरूप-वभूतभितपते वीरघोषादिरुद्रैस्तद्बह्यस्थैश्चतुर्थं द्रविणपतिमुखैः पञ्चमेकालमुख्यैः ॥ ··· ··· ··· ··· ··· ··· सप्तमे विष्णुमुख्यै रन्यस्मिन् तीक्ष्णदंष्ट्र प्रभृतिभिरमरेशादिभिश्चापरस्मिन् ॥ आधारे लोकपालैर्दिशि दिशि दशमे सायुधैस्सेव्यमानं भोगानास्वाद्य......भुवि तनुविरमे मोक्षमाप्नोति सोऽयम् ॥ चक्रं स्रग्वज्रशक्तीर्डमरुपरशुघण्टाहिखड्गप्रखेटान् बिभ्राणं दण्डपाशौ ध्वज नरशिरसी चापबाणौ भुजैश्च । दोर्भ्यां द्वाभ्यां महास्त्रं नियुतरविनिभं लूतमुण्डाहि भूषं चार्काभं कुण्डलाढ्यं कुमतविहतये घोरनाथं भजामः ॥

विद्युन्मालानलाभं भुजगपरिवृतं भीषणं निम्ननेत्रं शूलं पाशं च घण्टामनलमसिमहाखेटकं प्रज्वलन्तम् । सव्येऽभीशक्तिचापान् शरपरशुरुजा दक्षिणे घोरवक्त्रं पार्श्वे घोरास्त्रमेवं नियमितमनसा संयजेत् सर्वसिद्ध्यै ॥

जप्त्वायुतं ··· मनूत्तममष्टयुक्तं हुत्वा सहस्रमपमृत्युमपाकरोति ।
सन्ध्यासु चाष्टसहितं शतमत्र जप्त्वाध्यायन् कुबेरसदृशं श्रियमेति मर्त्यः ॥
आधारनाभिहृदये च गले च तालुभ्रूमध्यमूर्ध्न्यखिल शक्तिपदेषु देवम् ।
तेजोमयं स्मरति यः क्रमशश्च मोक्षं योत्युत्क्रमेण स नरः पुनरेति भोगम् ॥
यद्वैभवं तव महास्त्रमहानुभावान् स्तोत्रं समन्त्रपतयस्तदशेषमीशान् ।
काशक्तिरत्र वद तादृशमीदृशानां कश्चैकदेशगणको गणकीर्तिमेति ॥
एतामघोरास्त्रपदानुविद्धां यः स्तोत्रमालां पठति त्रिसन्ध्यम् ।
विजित्य शत्रून् विगताभयोऽसौ प्राप्नोत्यशेषानपि वाञ्छितार्थान् ॥

अघोरस्तवः सम्पूर्णः

——

अघोरपटल

ॐ हिमाद्रिशिखरासीनमीशानं पार्वतीपतिम्
त्रिशूल खट्वांगधरं कमालास्थिविभीषणम् ॥
गणगंधर्व सिद्धौघैः सेवितं त्रिपुरान्तकम् ।
स्कन्दैकन्तसहितं विकसद्वनांबुजम् । २ ।
गुणातीतं चिदाभासं सदसत्पदराजितम् ।
पार्वतीविनता भूत्वा प्रपच्छ परमेश्वरम् । ३ ।

श्री पार्वत्युवाच–

भगवन्सर्वलोकेश सर्वभूतदयानिधे ।
सर्वसत्वैकनिलयं प्रलयोत्पत्तिकारकः ४ ।
महादेव महारुद्र महागुण विभूषणः ।
महद्रूपमहेशान महाहीनोपवीतकः । ५ ।
महेशमदनध्वंन्मिहासेन वर प्रदः ।
त्वमेव वरदोनित्यं देवानामपि सर्वदा । ६ ।
त्वमेवत्रिजगन्नाथ त्वं सूर्यस्तं शशीशिवः ।
त्वं वह्निस्त्वं महावायुस्त्वं जलं त्वं वसुन्धरा । ७ ।
त्वमाकाशो महाकारस्त्वमेव परमागातिः ।
त्वदृग्तेऽन्यं न पश्यामि शतारंतरण प्लवम् । ८ ।
भगवन्मे प्रसीदत्वं वरं देव प्रयच्छमे ।
अघोरस्य पुरादिग्मुचितं पटलं बद ॥ ९ ।
येन सम्यक श्रुतेनैव साधकस्तत्पदं व्रजेत् ।
सारात्सारतरं ब्रूहि चेदस्ति मयि ते दया । १० ।

भैरव उवाच–

शृणु देवि प्रवक्ष्यामि पटलं देवदुर्लभम् ।
अघोरस्य महामन्त्रं यत्र सर्वस्व निश्चितम । ११ ।
अघोरो यः परोदेवस्त्रिजगत्प्रभुरीश्वरः ।
भैरवो भैरवाकारो निर्गुणो विश्वकारणम् । १२ ।
तेनेदं सृज्यतेविश्वं तेनेदं परिपाल्यते ।
तथा संह्रियतेचान्तेत्रैलोक्योद्धरणक्षमः । १३

तस्यां पटलं देवि पद्धतिं कवचं शुभम् ।
मन्त्र नाम सहस्त्रं च स्तोत्रंमंत्रमयं शिवे । १४ ।
तव प्रीत्या प्रवक्ष्यामि मन्त्रोद्धारं वरानने ।
मन्त्रोद्धारं लयांगं च प्रयोगं च दर्शवतु । १५ ।
श्रुत्वा गोप्यं प्रयत्नेन पंचांगं देविदुर्लभम् ।

"अथमन्त्रोद्धार:"

मात्रादि: षडभिज्ञ वह्निकुलिशास्तस्माद्वलंभारजिद् ।
वह्निं वज्र करोत्तमाग्नियुगलं रागाग्नि वज्रांकितम् ।
संकोचौर्वतनै शुभौ वकयुतौ शतस्यौर्वंवज्राम्भका ।
रत्यं द्वींद्रिय सिन्धुमत्स्यकुलिशा मन्त्रोयमाघोरिक: ।
इति मन्त्रोद्धार: ।

० प्रकाशं ०

अघोरेभ्योथघोरभ्यो घोरघोरतरेभ्य:
सर्वत: सर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्य: ।
नास्यविघ्नोनवा क्लेशो न विपर्ययभीस्तथा
न मोहो न च दारिद्र्यं न च दीक्षादिसंग्रह: ।
सिद्धसाध्यविचारोपि वैरिपक्षभयं नहि । १७ ।
साक्षांदमृतरूपोयमणिमाद्यष्टसिद्धिद:
दीक्षिताय कुलीनाय तंत्रमन्त्रार्थ संविदे । १८ ।
अष्टकीलविदेमन्त्रं संजीवन विदे परम् ।
अघोरस्यमनुर्देवि कीलैरष्टभिराश्रित: । १९ ।
मन्त्रकीलनमाचारं मन्त्रसंजीवनं परम् ।
सम्पुटंच प्रवक्ष्यामिगोपनीयं प्रयत्नत: । २० ।
वज्रस्ययंत्रभिर्वीजैर्विश्वराउक्षैरस्तथा ।
कीलितोयं महामन्त्र: सर्वैश्वर्य प्रदायक: । २१ ।
सूतोयमौर्ववीजैश्च विश्ववीर्यंत्रयेण च
एतेषां साधनं वक्ष्ये शृणु देवि यथोत्तमम् । २२ ।
आदावक्षादि वज्रान्तं दध न्मन्त्रो परिप्रिये ।
अयमुत्कीलनोमन्त्रो मंत्रसंजीवनं शृणु । २३ ।
विश्ववीजादि वज्रान्तमादौदयात्सुरेश्वरि ।
तत्पदे प्रोद्धरेदादि वीजवज्रान्तमीश्वरि । २४ ।
अस्यायं मंत्रराजस्य प्रोक्त: संजीवनोमनु: ।
सिद्धमंत्रस्य जप्तेदं संपुटस्य मनुं शृणु । २५ ।

विन्नादि वज्रबीजान्तमंते दयात्सुरेश्वरि ।
संपुटस्यास्यमन्त्रोऽयं गोप्तव्यः पशसन्निधौ २६ ।
(प्रकाशं) रुद्र रुपेभ्योअघोरेभ्योग्रघोरेभ्यो
घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यां नमस्ते ।

इत्युत्कीलन मंत्रः

सर्वतः सर्वसर्वेभ्यो घोरघोरतरेभ्यः
अघोरभ्योऽथघोरेभ्यो नमस्ते रुद्ररुपेभ्यः ।

इति सिद्धमंत्रः ।

अघोरेभ्योघोरघोरतरेभ्यः सर्वतः
सर्व सर्वेभ्योनमस्ते रुद्ररुपेभ्योथ घोरेभ्यः ।

इतिसंपुटमंत्रः

एवं जपेन्महादेवि दीक्षितः साधकोत्तमः
वर्ष लक्षावधि देवि पुरश्चरणमाचरेत ।
जीवहीनो यथादेहःसर्वकर्मसुनक्षमः
पुरश्चरणहीनो हि न मंत्रः फलदायकः ।
गृहेऽर्द्धरात्रे मध्याह्ने शून्यागरे चतुष्पथे
वटेश्मशानेरण्ये च पुरश्चर्य चरेत्सुधीः ।
भूकम्पे पूजयेद्देवं जपेन्मन्त्रं तथायुतम्
वर्षलक्ष जपस्यापिफलं प्राप्नोति साधकः ।
सुदिने सुग्रहे स्वच्छे पूजमेत्स्वच्छमादरात् ।
जपेन्मंत्रायुतं सम्यक् देवि कोटिफलं लभेत् ।
यंत्रोद्धारं प्रवक्ष्यामि सर्वतंत्रेषु गोपितम्
सर्वसिद्धिप्रदं यन्त्रं सर्वाशापरिपूरकम् ।

"अथयन्त्रोद्धारः"

त्रिकोणं सबिंदुं शरारं सनागं तथानागपत्रं सुवृत्तं कलास्यम्
चतुर्भूगृहोद्मासितं वृह्निरेखां सदौद्योतते घोरदेवस्ययंत्रम् ।

इतियन्त्रोद्धारः

अघोरस्यास्य मंत्रस्य महाकालोथ भैरवः
ऋषिउष्णीक छन्दः श्री मन्कालाग्निरुद्रकः ।
अघोरो देवता देवि वीर्य कर्णः समीरितः
श्रुतिबीजं तथाशक्तिः श्रवणः कीलकं तथा ।
अणिमाद्यष्टसिद्ध्यर्थं विनियोगः प्रकीर्तितः
अस्य श्री मदघोरमन्त्रस्य श्री कालाग्नि
रुद्र महाकाल वामदेव ऋषयः त्रिष्टुप्

पक्तिरनुष्टुपछन्दांसि श्री मदघोर भैरवो
देवता अणिमाद्यष्ट सिध्द्यर्थ अघोर जये विनियोगः ।
लमांग श्रृणु देवेशि सकलागमनिश्चितम्
येन श्रवणमात्रेण पुरश्चर्याफलं लभेत ।

इन्द्रो वह्नि धर्मराजो निष्पत्ति र्वरुणोनितः
कुवेर ईश इत्यासां यतमोद्वारपालकाः ।
दिग्पालान् दिक्ष संपूज्य विदिगीषगान्विक्षुप
दक्षिणावर्तकेनार्चा चरेत्सार्वक सत्तमः
अर्द्धेगणपतिपूज्यो वटुकोथः प्रयत्नतः ।
पूर्व पश्चिमयोर्देविसाधकैर्मन्त्र साधकैः
नं द्रिन्चभंगिरीहं च दक्षिणोत्तरयोस्तथा ।
देवे शिविरथिवद्वक्षे श्रृणुष्व अष्ठदलार्चनम्
न हि विरेश सौभाग्य भंगिरीटि विगूढकाः ।
पुष्पदनाविकेताल्प चित्त लोहित सुंदकाः
त्रिपुरारिथ विचारोग्ररुपस्वप्न विनर्तकाः ।
गणाः षोड़श संपूज्य षोडशारेसु सुन्दरो ।
अथाष्टदल पूजां तु प्रवक्ष्यामि वरानने ।।
यां विधायाद्र्धरात्रे तु सद्यः सिद्धि मवाप्नुयात् ।
महाकालश्च कालाग्निः संहारोरुद्र भैरवः ।।
उन्मत्तः समरानन्दः करालोविकरालकः ।
पूज्या अष्टारकेष्वेवं साधकैरष्ट भैरवाः ।।
अष्ट कोणार्चनं वक्षे श्रृगु पर्वतनंदिनि
व्रह्माद्यामातरः पूज्या अष्ट कालेपु साधकैः ।।
व्राह्मी नारायणी चैव कौमारी चापराजिता
माहेश्वरी च चामुण्डा वाराही नारसिंहिका ।

वामावर्तेनसंपूज्य एता अन्ये च सव्यतः
पंचकोण महादेवि प्रसन्नमुख पंकजम् ।
ददास्यमुष्ट वक्यं च वह्नि वक्त्रं वरानने
व्यालास्यमकरास्यं च पूजनीया प्रयत्नतः ।
सव्यावर्त क्रमेणैव दूर्वाकुंर च येः शिवेः
त्रिकोणे पूजयेद्देवि नदोस्तत्र विशेषतः ।
गंगा च यमुना चैव पूर्वा श्रादौ सरस्वतीम्
वामदेवं महादेवं सद्योजातं सदाशिवम् ।

वलप्रमथनं सर्व तथा विकरणं वलम्
छिंदी संपूजद्देवमघोरं मन्त्रनायकम् ।
ततः संपूजयेदेवि ईशानं रुद्रमेव च
तत्पुरुषादि गायत्री सावित्री भारती तथा
एतद् त्रयागं त्रिविधिं त्रिसुतंत्रेषु गोपितम् ।
ध्यानमस्य प्रवक्ष्यामि यथा ध्यात्वा जपेन्नरः
त्रिविधां त्रिगुणां कंच रजसत्त्वमोनयम्

॥ अथ ध्यानम् ॥

श्री चन्द्रमण्डलगतांवुज पीठमध्ये देवं सुधास्त्रविणमिन्दुकलावतंसम् ।
मुद्रक्षसूत्र कलशामृत पद्महस्तं देव भजामि हृदये भुवनैक नाथम् ।

इतिध्यानम्

स्वानाभी भैरवं ध्याये कुलं विकसितंसितम्
तन्मध्येतु रजः सत्व तमो रूपं विभावयेत
तस्य मध्ये तु तं देवं सूर्यकोटिसमप्रभम्
अष्ठादश भुजं दिव्यरजोगुणविभूषितम् ।
वालार्किमराडलाकारं लोचनत्रयभूषितम्
मूद्राक्षसूत्रवलयं शूलगदाधरम् ।
कुन्त खड्गधरं चैव पाश पट्टि शधारिणम्
शक्तितोमरनाराच यम खट्वांसभूषितम् ।
सूर्वाकलशवत्रांगं वरामयकराम्बुजम्
दिग्म्बरं वक्रकेशं पिंगकेशजटाधरम् ।
अष्टाभिमात्रिभिः युक्तं गजगंधर्वसेवितम्
महामंत्रात्मकं देवमघोरं मंत्र नायकम् ।

"चेतसिस्मरेदिति ध्यानम्"

प्रयोगं श्रृणु देवेशि दशतंत्रेषु गोपितम्
येन सम्यग्विधानेन जीवन्मुक्तिभविष्यति ।
स्तंभनं मोहनंचैव मारणं कर्षणं तथा
बशीकारं तथोच्चाटं शक्तिकं पौष्टिकं तथा
सांतानिकं मौक्तिकं च प्रयोगा दशकीर्तिता ॥
एतेषां साधनं वक्ष्ये यथावच्छ्रणु पार्वती
विधाम विधिवत्पूजा तत्वेनाघोर भैरवीम् ।
गत्वादर्धरात्रे विपिना ध्यानं कृत्वा नदीतटे
वने चतुष्पथेवापि साधको विजितेन्द्रियः ।

आसने साधनं कृत्वा वटमूले महेश्वरो
देवं सम्पूज्य स्वे यन्त्रे पठेत्कवचमादरात् ।
मन्त्र नाम सहस्त्रं तु मन्त्रस्तोत्रं च पार्वतोः
मूलं निष्कीलकं कृत्वा पठेद्युत संख्यया ।
होमोदशांशतः कार्यः सर्पिगोध्म चूर्णकैः
नील सूत्रेण पुष्पैश्च श्वेतैनीलैस्तथा शिवे ।
रजस्वला श्रृगकेंण कर्पटेण विशेषतः
दर्पयित्वा दशांशेन मार्जयित्वा दशांशतः
संभोज्य विधिवद्विप्रानभस्मना तिलकं व्रजेत
स्तंभनं जायते शीघ्रं रविचन्द्रादिपाथसाम् ।
रिपुसैन्यानि दस्यूनां कामिनां स्तंभनं भवेत्
कुग्रहे कुदिनेरात्रौ शक्तिं सम्पूज्य साधकः ।
अन्यां वास्वां मह देवि शक्तिं सम्पूज्य विधानतः
तथैव सुरतं कृत्वा ध्यात्वा घोरं सुरेश्वरम् ।
नदीतले तथोद्याने ततस्थो विष्टरासनः
अयुतं तु जयेन्मूलं होमआयस सर्पिषा ।
तेन रेतोत्थकलकेन भस्मना तिलकं चरेत्
मोहयेदरिवत्यां लोकां मोहयेदयिकेशवम् ।
मोहयेदपिवत्माणं किं पुनः क्षुद्रमानुषान्
कृतिकाद्यन्तचरणे गत्वा शून्याटवीं शिवे ।
संपूज्य विविधैः मंत्रैः देवं सपरिवारकम्
शत्रुनामान्च संकल्प्य जपेन्मूलं तथायुतम् ।
होमः कोर्कपलेनैव सर्पिषा सर्षपैस्तथा
सद्यः एवारिं युद्धे विभारमेन्नात्र संशयः ।
शुभेह्नि देवि मध्याह्ने पुजयेद्देवमीश्वरम्
जपेन्मूलं ह्री साहस्त्रं होमयेत्कुसुमानि च ।
सर्पिषा वापि शैलेषा कोर्दूषं हि संभलम्
आकर्षयेत् देवकन्याः स्वर्गस्थापि सुन्दरी ।
सुदिने देवि मध्याह्ने गत्वोपवन मंडलम्
सुवृक्षस्यतले देवि पूजयित्वा महेश्वरम् ।
युतं देवि होमं कृत्वा विधानतः
जातो फूलैश्चदध्ना च सर्पिषाकुसुमैस्तथा ।
सर्करा क्षौद्रमिश्रेण तर्पयित्वा दशांशतः
इन्द्रोऽपि वशतामेति के वराका इमे नृपाः ।
शनौ रात्र्यावशाने तु स्नात्वा कर्माह्निकं चरेत्
अश्वत्थस्य तले देवं पूजयेच्छिव सुन्दरी ।

भूमौ यन्त्रं लिखेन्मंत्रैर्वर्णैः सं वेष्टयेत्ततः
मूलेन पूजयेद्यन्त्रं जपेन्मूलं तथायुतम् ।
होमः सर्पिय वैनत्स्यैः शृंगाल पत्तनसर्षपैः
कर्मणा मनसा वाचा मुच्चाटयेद्ध्रुवम् ।
सुवर्पे दिवसे सायं चन्द्रं दृष्टोदितं शिवे
षट्कारेणादिशो बद्ध्वा विधायागन शोधनम्
जप्त्वा मूलायुतं मंत्रे होमः सर्पिकचैर्नरवैः ।
ममुष्याणां तथांत्रैश्च विडालस्य महेश्वरिः
दुर्भिक्षकाले देवेशि सद्यः शान्तिर्भविष्यति ।
स्वजन्म दिवसे जन्मकालोवसरके तथा
सम्पूज्य विधिना देवं जपेन्मन्त्रायुतं शनैः
होमयेच्छतक्षीरादि पायसामलकत्वचः
नृमांस मत्स्य खण्डानि तथांत्रयुष्टकस्य च ।
देवानां च त्रिलोकाणां महापुष्टिः प्रजायते
स्वविवाह दिने देवि कामान्तुसाधकोत्तमः
यथोक्तं विधिना सम्यक् शक्तिपूजां चरेत्ततः ।
रतोत्सवे महानंदे जपेन्मन्त्रायुतं शिवे
शक्तिः वृक्षः समासीनः शक्तिपूजा परायणः ।
होमो रजस्वलारक्तैसिक्त कर्पट खंडकैः
घृतपायस मृद्वीका शर्करादिप्रसूनकैः ।
वन्ध्या च मृतवत्स्यापि लभेत संततिशुमान्
तिष्येवकर सोत्पन्ने मध्याह्ने चार्द्धरात्रके ।
शून्यागारं समागत्य श्मशान वा महेश्वरी
यथोक्त पूया देवी होमयेद्घृतपायसम् ।
अथोपहारयेद्देवि मीनकंठमासृजम् ।
स्त्री गर्भो निगडैर्वद्धो योगो रोगो सरो……?
मुक्तिमेष्यति देवित्वं सत्यं जानिहि मद्वचः
एते प्रयोगाः सकलाः साध्यासाधकरुत्तमैः
गोपनीया विशेषेण रक्षायै स्वात्मनः प्रिये
ईतीदं पटलं गुह्यं तंत्रमंत्राभ्वुधिप्त्वम्
गुह्य सर्वस्यमोशस्य गोपनीयं प्रयत्नतः ।

"इति अघोर पटलः समाप्तः"

श्रावणशुक्ल नागपंचम्यां सम्बत् १९३२ लिखित विनायक धर दुबे जेलखाना खंडवा, जिला-निमांड ।

अघोर पूजा पद्धति

प्रातरुत्थाय शिरसि श्रो गुरुं ध्यायेत । तद्यथा ।

सहस्त्रदल पंकजे सकलशीतरश्मि प्रभंवरा—
मयकराम्बुजं विविध गंध पुष्पांवरम् ।
प्रसन्न मुखपंकजं सकल देवतारूपिणं
स्मरेच्छिरसि सततं तदमिधानपूर्वगुरुम् । १ ।

श्री गुरुं परमानन्दं षदान्यानंद विग्रहम् ।
यस्य सन्निधिमात्रेण चिदानंदयतेवपुः । २ ।

इति ध्यात्वा नमस्कृत्यावश्यकं कृत्वा यथाविधि ध्यानं कृत्वा संध्यां कृत्वा मंत्रं संध्या समाप्य तर्पणं कुर्यात् । पितृतर्पणपूर्वक गृहमागत्य सामान्यार्थं विधाय द्वारपूजां कुर्यात् । तद्यथा-सूर्यायार्थं दत्वा पूजयेत ।। हुंफूडिति द्वारं प्रक्षाल्य ।। ऊर्द्धं गणेशाय नमः । वामदक्षिणो क्रमात् महालक्ष्मै नमः । सरस्वत्यैः गंगायै । यमुनायै । धात्रेः । विधात्रेः । नंदाय । सुनंदाय । चंडाय । प्रचंडाय । क्षेत्रपालाय । वेतालाय । अग्निवेतालाय नमः । ततः आसनमंत्रेणपुष्पं कृत्वा । अनन्तासनाय नमः । विमलासनाय । पद्मासनाय नमः । पृथवो तयाधृता लोका देवित्वं विष्णुनाधृता त्वं चाधारम मां देवि पवित्रं कुरुचासनम् । इत्यासनमंत्रः । त्रिवामपर्श्वेधातं कृत्वा ।

अपसर्पन्तु ते भूताः ये भूताः भुवि संस्थिताः
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया ।

इति विघ्नानुत्सार्य —

अघोराय फूडिति दशदिशोवद्धा भूत शुद्धि कुर्यात् । अद्य भूतशुद्धिमहं करिष्ये, इतिसंकल्पः । वामे गुरुभ्यों नमः । इति नमस्कारः । प्रणवेन प्रणायामत्रयं कृत्वा हूमितिमूलाधारात्कुंडलिनीमुत्थाय सुषुम्ना वर्त्मना हृदयस्थं जीवमादाय ब्रह्मरंध्रगतं विभाव्य हंस ब्रह्मणि योजयेत ततः पादादि जान्वंतां पृथ्वी जान्वादि नाभ्यंतं जलं नाभ्यादि हृदयान्तं वह्नि हृदयादिभ्रूमध्यान्तं वायुं भ्रूमध्यादि द्वादशां तमकाशं प्रत्येकं प्रविलाप्याकाशमहंकार । अहंकारमहं तत्त्वे । अहं प्रवृत्तो । सच्चिदानन्द रूपे । ब्रह्मणि विलाध्यात्मानं ब्रह्ममयं विभाव्य । अहं देहो न चान्योस्मि ब्रहमैवाहन शोकमाक् । सच्चिदानन्द रुपोऽहं नित्यमुक्त स्वभाववान् । एवं विभाव्य स्वशरीर दक्षकुक्षो पाप पुरुषं ध्यायेत् ।

ब्रह्महत्याशिरस्कं च स्वर्णस्तेयश्च बाहुकम
सुरापानं हृदायुक्तं गुरुतल्प कटिद्वयम् ॥
तत्संयोगादिपदत्व चकरोम प्रत्यगं पातकं
नुपपात करोमाणं रक्तंश्मश्रु विलोचनम् ।
खड्गचर्मधरं पाप मष्टापरि प्रमाणकम्
अधोमुखं कृष्णवर्णं दक्ष कुक्षौ विचिंतयेत्
इति ध्यानम्

यमिति वायुवीजेन प्राणायामः ३२ । कुंभकं । ६ । रेचमेत् १६ ।

रचशरीरयुत पापपुरुषं विशोध्यपरमिति वह्निवीजेनदह्यं विधाय भस्मरुपं ध्यात्वा । यमिति वायुवीजेन प्राणायां तेन दृगु पापपुरुष भस्म वहिः रेचयेत् । ततोवामित्य-मृतवीजेन प्राणायायं तेन शरीरपिंडीभूतं विभाव्य हमित्याकाश वीजेन प्राणायामः । तेन शरीरं निष्पाद्य भूतानुत्पाद्य द्वादशान्त जीवमादाय निर्गच्छन्तीं कुंडलिनीं ध्यात्वा हृदये सोऽहमिति जीवं संस्थाप्य मूलाधारगतां कुंडलिनीं ध्यायेत् ।

इति भूतशुद्धिः । ततः ऊँ जप्त्वा । १६ ।

पूर्व दिनमरुणोदयमारभ्योछ्वास निःश्वास रुपेण निष्पन्नमजपाजपगाधारादिस्य गणेशादिभ्यः समर्पयिष्ये इति संकल्पः । आधारस्य गणेशाय षटशतं स्वाधिष्ठानस्य ब्रह्मण षटसहस्त्रं । माणिपूरस्य विघ्नवे षट सहस्त्रमनाहस्धं रुद्राय षटसहस्त्रम् ।

विघ्नस्य जीवात्मने सहस्त्रमाज्ञास्य परमात्मने सहस्त्रं द्वादशांतस्यं गुरवे सहस्त्रमजपागायत्री जप निवेदयामि नमः । इत्यजपा संकल्पः ।

ॐ सदाशिवाय विघ्नहे अंबकायं धीमहितन्नः शिवः प्रचोदयात् । अस्य प्राण-प्रतिष्ठामंत्रस्य ब्रह्मविघ्न महेश्वरा ऋषयः ऋग्जजुसामनिदांसि प्राणशक्ति देवता । ओं वीज क्षों शक्तिः मम प्राणस्थापने विनियोगः । ब्रह्मविघ्न महेश्वरेभ्यो नमः शिरसि । ऋग्यजुसामभ्यो नमो मुखे । प्राणशक्तये नमो हृदिः । ॐ वीजाय नमो गुह्ये । ॐ शक्तये नमः पादयोः । ततो वक्ष्यमाण खड्गम् ।

टं कं खं गं घं आभाकाश वायुर्वह्नि जल पृथिव्यात्मने हृदयाय नमः । जं चं छं झं शब्द स्पर्शरूपरसगंधात्मने शिरसे स्वाहाः । णं टं डं ढं त्वक्चक्षुजिह्वा घ्राणत्मने शिवायै वषट् । नं तं थं दं धं वाक्याणि पादपायूपस्थात्मने कवचाय हुं । मं पं फं वं भं वचनादानगमन विसर्गानन्दात्मने नेत्रत्रयाय वौषटः । सं यं रं लं वृं शं षं मनोमूर्द्धाहंकार चित्तात्मने करतलकर पृष्टाभ्यां नमः । अस्त्राय फट । ऊं नमः नाभ्यादि पादांतम् । यं त्वगात्मने नमः । वं मेदात्मने नमः । शमस्यात्मने खां मज्जात्मनेः । सक्रोधात्मने हं जयात्मनेः । क्षं विजयात्मनेः हं प्राणात्मने । संजीवात्मने नमः । एतान हृदिः । रक्ताद्रियोतारुज पद्मसांस्थां पाशांकुशांमिक्षसरासवाणान् शूलं

कपालं तधनो करादृ रक्तां त्रिनेत्रां प्रणमामि देवीम् । इति ध्यात्वा मानसैः संपूज्य हृदिस्थां निधाय जयेत् ।

ऊं ह्रीं क्रीं यं रं लं शं खं, ऊं ओं क्षं हं सं सः क्षीं हंसः मम प्राणा इह प्राणाः पुनः ऊं ममजीव इह स्थितः पुनः मम सर्वेन्द्रियाणि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहाः । इति प्राणप्रतिष्ठाः । अथ मातृकान्यासमाहः । प्राणायामत्रयं कृत्वा मातृकाया ब्रह्माऋषिः गायत्रच्छंदः मातृका सरस्वतीदेवता हृजोंबीजानि स्वरा शक्तयः नु पास्यमान भवाशंकरमात्रांगत्वेन न्यासे विनियोगः । ब्रह्मणे नमः शिरसि । गायत्र्यैः मुखे । सरस्वत्यै हृदिः । हल्यो गुह्ये । स्वरेभ्यो पादयोः ।

अः कः खः गः घः टः आः अंगुष्ठाभ्या नमः इः चः छः जः झः ञः ईः तर्जनीभ्यां । उः टः ठः डः ढः णः ऊः माध्यमाभ्यां । इः चः छः जः झः ञः ईः शिरसि स्वाहाः । उः टः ठः डः ढः णः ऊः शिखायै वषट् । एः तः थः दः धः नः ऐं कवचाय हुं । ओंः पः फः वः भः मः औं नेत्रत्रयाम वौषट् । अं यः रः लः वः शः षः सः हः लः क्षः अः अस्त्राय फट् । एवं खड्गं कृत्वा ध्यायेत् ।

पंचाशद्विपिमिर्विभक्तमुखदोः यत्संधिवक्षस्थलां
भास्वन्मौलिनिवद्ध चन्द्र सकला मायीनतुंगस्थलीम् ।
मुद्राभक्ष गुणं सुधाध कलशं विद्यां च हस्ताम्वुजैः
विभ्राणां विषदप्रमां त्रिनयनां वाग्देवतामाश्रये ।

एवं ध्यात्वा मानसोपचारैः सम्पूज्य न्यासं कुर्यात् । अं नमः कोशान्ते । आं मुखवृत्ते । इं दक्षनेत्रे । ई वामनेत्रे । उं० दक्षकर्णे । ॐ वामकर्णे । ऋं दक्षनासापुटे । ऋं० वामनासापुटे । लृं दक्ष कपोले । लृं वाम कपोले । एं० ओष्ठे । ऐं अधरोष्ठे । ओंः उर्ध्वदन्तपंक्तौ । औं अधोदन्तपंक्तौ । अं शिरसि । अः जिह्वायां । कं खं गं घं ङं०दक्षहस्त संधिषु । चं छं जं झं ञं वामहस्त संधिषु । टं ठं डं ढं णं दक्षपाद संधिषु । तं थं दं धं नं वामपादसंधिषु । पं नमः दक्षपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ ।। मं नुहरेयं हृदये । ईः वामांसे । लं. ककुदिनं दक्षांसे । शं नमः हृदयापि दक्षभुजांतम् । यं हृदयादि वामभुजांतम् । सं० तदादि दक्षपादान्तां । हं तदापि वामपादान्तन् । लं तदादि जठरान्तां । क्षं तदादिमुखान्तम् । इति पृष्ठमातृकान्यासः । श्री कंठादिमातृकाया दक्षिणामूर्ति ऋषिः गायत्रं छन्दः । अर्धनारीश्वरो हरो देवताः । हनो वीजात्री स्वरा शक्तयः । नुपास्यमानाघोरमंत्रागत्वेन-न्यासे विनियोगः । दक्षिणामूर्तये नमः शिरसि । गायत्र्यैः मुखे । अर्धनारीश्वरायहृदिः । हल्भ्यो गुह्येः स्वेरभ्योः पादयो । हंसां हृदयाम नमः । हंसी शिरसे स्वाहा । हंसू शिखायै वषट् । हंसै कवचाय हुं । हुंसौ नेत्रत्रयाय वौषट् । हः सः अस्त्राय फट् । इति खड्ग न्यासः । अथ करन्यासः । हंसां अंगुष्ठाभ्यां नमः । हंसीं

तर्जनी । हंसू मध्यमाभ्याम् । हंसै अनामिकाभ्याम् । हंसौ कनिष्ठिकाभ्यां । हंसः करतल पृष्ठ.भ्यां नमः । अथ ध्यानम् ।

वंधूक कांचन निभं रुचिराक्षमालां
पाशकुशैः चवरदं निज बाहु दंडैः ।
बिभ्रावमिन्दु सकलाभरणां त्रिनेत्रम्–
र्घाविकेशमनिशं वपुराश्रयामः ।
इति ध्यात्वा मानसैः सम्पूज्य न्यसेत् ।
हं सौ अं श्री कराठेरापूर्णोदरीभ्यां ललाटे ।।

ऊं हंसौ आं अनंलेशापि रजाभ्यां मुखे ।। हंसौ इं सूक्ष्मेशशाल्मलीभ्यां वामनेत्रे । ऊं अमरेशवत्तुर्लक्षीभ्यां दक्ष कर्णे । ऊं अधीशदीर्घ घोड़ाभ्यां वाम कर्णे । ऋं मार भूतेशदीर्घमुखीभ्यां दक्षनासापुटे । ऋं अनिथीश गोमुखीभ्यां नमः वामनासा-पुटे । लृं स्थांड वेश दीर्घ जिह्वाभ्यां० दक्ष कपोले । लृं हरेश कुंडोदरीभ्यां वामे । एं ऊं ठेश उद्र्ध्वमुखीभ्यां० उर्द्धोष्ठे । ऐं मौलिकेश विकृत मुखीभ्यां अधरोष्ठे । ऊं सद्योजातेश ज्वालामुखीभ्यां उर्ध्वदन्त पंक्तौ । ऊं अक्रूरेश श्री मुखीभ्यां नमः शिरसि । अः महासीनेश विद्यामुखीभ्यां जिह्वायाम् ।

कं क्रोधेश महाकालीभ्यां नमः दक्ष बाहुमूले । खं चंडेश सरस्वतीभ्यां कर्पूरै । गं पंचातकेश सर्वसिद्ध गौरीभ्यां मणिवंधे । वं शिवोत्तमेशग्नि लोक विद्याभ्यां अंगुलिमूले । रु रुकेश त्रिमूर्तिभ्यां अंगुल्यग्रे । चं कुर्मेशात्मशक्तिभ्यो० वामबा-हुमूले । छं अनेकनेत्र भूतभातृभ्यां ० कर्पूरै । जं चतुराननेश लंबोदरीभ्यां मणिवन्धे । ऊं अपेश द्रावियोभ्यां अंगुलिमूले । त्रं सर्वेश नागरीभ्यां० अंगुल्यग्रे ।

तं सोमेश रवेचरीभ्यां० दक्षपादमूले । ठं लांग लेशमञ्जरीभ्यां० जानुनि । डं दारुकेश निरुपीणीभ्यां गुल्फे । ढं अर्धनारीश्वर वारिणाभ्यां श्रंगुलिमूले । णं उमा-कान्ते शकाकोदरीभ्यां वामपादमूले ।

धं दंडीशभद्र कालोभ्यां जानुनि । दं अत्रीश योगिनीभ्यां गुल्फे धं मीनेश शखिनीभ्यां अंगुलिमूले । नं शेषेश गततर्जनीभ्यां अंगुल्यग्रे । पं लोहितेश कालि-रात्रिभ्यां दक्षपार्श्वे । फं शारदी शकुतर्जनीभ्यां० वाम पार्श्वे । बं छांगलेश कर्पदिनीभ्यां पृष्ठवंशे । मं दिरंडेश विज्रिणीभ्यां नाभौ । मं महाकालीश जयाभ्यां० उदरे । ऊं हंसौयं त्वगात्मभ्यां वलीश सुमुखीभ्यां हृदये असृगात्मभ्यां भुजंग रैवतोभ्यां वामांशे । लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां ककुदि ।

वं मेदात्मभ्यां खड्गेश वारुणीभ्यां दक्षांशे । शं अस्थात्मभ्यां टं केशवाणीभ्यां हृदादि दक्ष हस्ताग्रात । षं भज्जात्मभ्यां स्वेतेशरक्षोविहरिणीभ्यां० हृदादिवाम-हस्ताग्रातम् । लं शुक्रात्मभ्यां वृगवीश सहजाभ्यां हृदादिदक्ष पादन्तं । हं प्राणा-

त्मभ्यां लकुलेश लक्ष्मीभ्यां० हृदादिवाम पादाग्रातम्। डं शलयात्मभ्यां शिवेशव्यापिनीभ्यां हृदादि जठरान्तं। क्षौं हंसौं क्रोधात्मभ्यां सवर्तकेश महामायाभ्यां० हृदादि मुखान्तम्। इति श्री कंठादि न्यासः। अथाष्टात्रिंसत्कलान्यासः ईशानः सर्वविद्यानामित्यस्य ईश ऋषि भूरिगनुष्टुप छंदः। ईश्वरो देवतान्यासे विनियोगः! तत्पुरुषादित्यस्य तत्पुरुष ऋषिः गायत्र छंदः आपोदेवता न्यासे विनियोगः।

वामदेवेत्यस्य वामदेव ऋषिः पंक्ति छंदः भर्गो देवतान्यसे विनियोगः। सद्योजातायेत्यस्य वामदेवः ऋषिः अनुष्टुप छंदः। भर्गोदेवतान्यासे विनियोगः ईशान तत्पुरुष घोर वामदेव हरेभ्यो नमः। शिरसि भूरिगनुष्टुप गाय अनुष्टुप कषानुष्टुप कृत्वा नुष्टुपभ्यो नमः। मुखे ईश्वरापोग्नि भगेभ्यो० हृदिः। ईशानः सर्वविद्यानां ईश्वरः सर्वभूतानां ब्रह्माधिपति ब्रह्मणोधिपतिः ब्रह्मशिवः सदाशिवो मे अस्तु इत्यंगुष्ठाभ्यां नमः। तत्पुरुषायविदमहे धीमही तन्नो रुद्रः प्रचोदयात् इति तर्जनी। ॐ अघोरेभ्योथघोरेभ्यो घोर घोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्र रुपेभ्यः इति मध्यमाभ्यां नमः। वामदेवाय ज्येष्ठाय श्रेष्ठाय काखाप कलाविकरणाय बल विकरणाय बलप्रथमनाय नमः सर्वभूत मनोन्मनाय इत्यनामिकाभ्यां नमः। सद्योजातं प्रपद्यामि सद्योजाताय वै भवनेति भवे भजस्व मां भवोम्दवाय इति कनिष्ठिकाभ्यां। तेनैव पञ्चमंत्रेण पंचवक्रेसु न्यासः ततः खड्गन्यासः। ॐ ऐं ह्रीं श्रीं हंसो सर्वज्ञायांगुष्टाभ्यां हृदयाद ४। अमृप्त तव्जालामलिनि नित्यतमये ब्रह्मा तर्जनीभ्यां नमः शिरसे स्वाहाः ४। हंसौ ज्वलिताशिखि शिखायानादित्रो धाप मध्यमाभ्यां शिखायै वषट् ४, हंसौ वज्रिणो वज्रहस्ताय स्वतां त्रायानामिकाम्यां कवचाय हुं ४, हंसौ संभौदैनित्यमलुप्त शक्त्ये कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ४, हंसौं क्रीं ह्रीं करतल पृष्ठाभ्यां पाशुपतास्त्राय फट् इति करांगन्यासः, ॐ ह्रीं हौं नमः शिवाय ईशानः सर्वविद्यानां शशिन्यै पूर्वमुखे, ॐ ह्रीं हौं शिवाय ईश्वरः सर्वभूतानां ब्रह्मादिपतिः अंगद पैः उत्तरमुखे, ॐह्रीं हौं ब्रह्मणोधिपतिर्वहम् दायै पश्चिमुखे, ॐ ह्रीं हौं शिवायशिवो मेअस्तुमरीच्यैः दक्ष मुखेः, ॐ शिवाय अंशुमालिन्यै नमः उर्ध्वमुखे इतिज्ञानकला।

अथ तत्पुरुषकला —

ॐ ह्रींहौं नमः शिवाय तत्पुरुषायविद्महे शान्त्यै नमः पूर्वमुखे। ॐ महादेवाश्वधीमही विद्यायै नमः उत्तरमुखे! ॐ तन्नोरुद्रः प्रतिष्ठायै नमः पश्चिममुखे, ॐ प्रचोदयाग्निवृत्यै नमः दक्षिणा मुखे। इति तत्पुरुष कला अथाघोरकलाः। ॐ ह्रीं हौं नमः शिवायाघोरस्तमायै नमः हृदये ॐ नमः। शिवायाथ घोरेभ्योमोहाय नमः ग्रीवायाँ ॐ नमः शिवाय घोरव्याध्ययेनमः पृष्टे पृष्टे। नमः शिवाय घोरतेभ्योक्षमायै नमः दक्षिणांशे। नमः शिवाय सर्वतः रुद्रायैः वामांशे। सर्वभवेभ्योमृत्यवे नमो नाभौ ॐ। नमस्तेऽस्तु तृषायै नमः उदरो ॐ। रुद्ररूपेभ्यः क्षुधायैतमः पार्श्वे।

इत्यघोरकलाः । अथ महादेव कला । ऊ ह्लीं हौं नमः शिवाय वामदेवाय रजसायै नमो गुल्फे उ । नः रक्षायै नमः गुहे उ । नः श्रेष्ठाय विकरिरायैः नमो दक्षिणास्फिजिः । नमः कलाय कारिरायै वामस्फिजिः । नमः कलविरणाय कल्यै नमः दक्षकटयां उ नमः वलविकरणाय वलप्रमथिन्यै नमो वामकट्यां उ नमः वल प्रमथनाय सर्वभूतदमिन्यै नमोदक्ष पार्श्वे उ । नमः मनोन्मनाय रत्यै नमो वामपार्श्वे उ । नः सर्वाय दमिन्यै नमो दक्षौरीः । उ । नमः दमनाय प्रीत्यै नमोवामोरी । उ । नमः दमनाय पालिन्यै नमो दक्षजानौ उ । नमः भ्रामिन्यै नमो वामजनौ उ । नमः उन्मनायपालिन्यै नमोलिंगे । इतिश्रीवामदेव कलाः । अथ सद्योजातकला अष्टौयथा ॐ ह्लीं हौं नमः शिवाय सद्योजातं प्रपद्यामिसिद्ध्यै नमो दक्षपार्श्वे उ । नमः सद्योजाताय वैवृद्ध्यै नमो वामपार्श्वे उ । नमः शिवाय भवोदूत्यैः नमः दक्ष पादतले उ । नमः ऋभवेलक्ष्म्यै नमो वाम पादतले । नमः नाति भवेमैधार्ये नमः प्राणो । उ । नमः भजस्व मां प्रज्ञायै नमोमलको उ । नमः भवाय स्वाहावै नमो दक्षवाहै । उ । नमः उद्भवाय स्वाहायै नमो वामवाहैः । उ । इतिसद्योजातकला: । श्री :

दिक्षुञ्जुप्ताज्ञामपश्वा इ सुमति जन्नुवा मैं द्रवरा हराज्ञाम्
हृङ्ग्रीवासनाभ्युदखरसवक्षस्फि गुल्फांडयोश्च
पूर्वजान्वो: स्फिगुभयकरे पार्श्वावक्षस्थलेषु
घ्राणौ के वाहुयुग्मेष्वपि विषटमति विन्यसेदंगुलीभिः ।
विन्यास· प्रतिभा कृतौ तु नितरां सान्निध्य कृतसनादयं
देहेवापि शरीरिणां निगदितः सान्निध्यकारोति च
आस्ते तत्र यथामुनेर्वेदिनशो विन्वस्त देहः युमान्
क्षेत्र देशमभुं च योजनमितं शैवाज्ञमाज्ञा विदुः ।

अथ ध्यानम् ।

शुद्धस्फटिक कान्तिमिन्दू मुकुटं अक्षैर्मुखैपंचभिः ।
मुक्त्वा हेमपयोदकुंदविलसत्सिदूर वर्णैयुतम् ।
अग्नि वज्र कृपाण टंकविलकृच्छूलाहि घंटांकुशम् ।
न्यासं भीतिहरं दधानमनिशं दोर्भि महेशं भजे ।।

यथाविधिपूजनम्

एवं न्यासं तनौकृत्वा पीठन्यासं समाचरेत्
पीठशक्तिं तनौन्यस्य न्यसेत् पीठमनुं ततः ।
ततो ध्यात्वा महादेवं सुकल्पादिन विग्रहम्
तस्य मुद्रा प्रदर्श्यान्यर्पूजयेन्मनसा विभुम् ।

ततोर्घं स्थापयेद्ब्रह्म पूजनाय यथाविधिः
गुरुपदिष्ठा विधिना पुनर्ध्यात्वामहेश्वरम् ।
पीठपूजां ततः कृत्वा तच्छक्तीस्तत्रपूजयेत्
तस्य मंत्रेणामध्ये च पूजयेदासनं विभोः
मूलेन मूर्ती प्राप्तायां शिवमावाहयेत्ततः ।
आवाहनादिस्तंतु पुष्पां तैरुपचारकैः
अर्चयित्वा ततोन्यसेद्वेदवाक्यावृत्ते सुधी ।
न्यस्तैवं पंचभिवहम त्रिभिश्च शिवमावहेत् ।
प्राग्निरग्नि मध्ये प्राग्याभ्यसोभ्यापरदिशि पुन-
र्रगैरंतादिभिश्च अंगेभाद्यं दिशां येः
पुनरपि कुर्वतशाधै यजेदेवयुक्तं पंचब्रह्म
विधान सकल सुखजन्सो मुक्ति भुक्ति प्रदं च ।
ततो धूपादिभिस्तं च पूजयेदुपचारकैः
जपं कृत्वा निवेद्यैवं ततो देव विसर्जयेत् ।
कुर्मात्पूर्वादितान्यासान् षडंगन्यासपूर्वकान्
ततस्तक्षैव मंत्रेण न्यासान् कुर्याद्विचक्षणः ।
ततः कल्पोक्त मार्गेण पूजयेत्तं यथाविधिः

"अथार्ध्यस्थापनमाह" यथा—

स्ववाम भागे त्रिकोण षट्कोण वृत्त चतुरस्त्ररूपं यंत्रं विलिख्य शंखमुद्रां प्रदर्श्य खड्गमंत्रैः सम्पूज्य फट् प्रच्छाल्य, मूलेन स्थाप्य—

ॐ मं वह्नि मंडलायदशकालात्मने घोरार्धपात्रासनायनमः गन्धाक्षताभ्या-मभ्यर्च्य ॐ—

मं धूम्राच्यै । यं कुष्मांडायै । ईं ज्वलिन्यै । लं ज्वलिन्यै । वं त्रिस्फुलिंग्यै । शंसुश्रियै । षं वसुरुपायै । सं कपिलायै । हं हव्यवाहायै । हं कव्यवाहायैः । नमः इत्पासने । ततः पात्रं प्रक्षाल्य तदुपरि संस्थाप्य । सूर्य मंडलाय द्वादशकलात्मने घोरार्घपात्राय । कं तपिन्यै । खां तपिन्यै । गं धूम्रायै । घं मरीच्यै । ङं ज्वा-लिन्यैः । चां रूच्यै । छं सुषुम्नायैः । जं भोगादायै । झां विश्वायै । ञं वोधिन्यै । टं धारिरायै । ठं क्षमायै । इति पात्रमध्ये पूजनीया कला । ततो मूलमंत्रेण जप्त्वा जलेनापूर्य । ॐ चन्द्रमण्डलाय षोडशकलात्मने घोरार्धपात्राय नमः । अं अमृतायै । आं आनन्दायै । इं युषायै । ईं उष्टयै । उं पुष्ट्यै । ऊं रत्यै । ऋं धृत्यै । ॠं शशिन्यै । लृं चांद्रिकायै । लॄं कान्त्यै । एं ज्योत्स्नायै । ऐं श्रियै । ओं प्रीत्यै । औं अंगहायै । अं पूर्णायै । अः पूर्णामृतायै ।

एतां जलमध्ये पूजनीयः ततो कुसुमद्रया:। गंगेयमुने चैवेति जप्त्वा मूलेनावाह्य मोमिमं सफूडितिच्छो टिकाभिः संरक्ष्य हूं गुह्य हं इति अमिति कृत्य शंखचक्रम् शूलयोनि मुद्रा प्रदर्शयेत् ततः पात्रादुद्कमादाय तेनोदकेन नेनमंत्रेणात्मानं याग वस्तूनि प्रोक्षयेत्। ॐ परमात्मामृत रूपेण। घोरचन्द्रमण्डलनिवासाय चन्द्रामृतेन पूरय पूरकद्रव्यमिदं पवित्रं कुरु ॐ हौं स्वाहा।

इति मंगः।

अनेन सर्वः प्रोक्षयेत्। आत्मानं सम्पूज्य शिरोहृदाधार सर्वांगेषु पुष्पानि दत्वा आत्मानं शिरः आत्मानं तन्मयं विभाव्य मूलाधारोधृत कुण्डलिनी संगत ललाट वं तशामृत तथाभिः सतर्प्य पीठपूजां कुर्यात्। पीठतरे गुरुभ्यो नमः। परमगुरुभ्यो। परापरगुरुभ्यो। परमेष्ठि गुरुभ्यो नमः। उत्तरगणेशाय नमः। मंडूकाय। कालाग्निरुद्राय नमः मूलप्रकृत्यै। आधार शक्त्यै। कूर्माय अनंताय वाराहाय पृथिव्यै उपर्युपरि संपूज्य तन्मध्ये सुधार्णयाय तन्मध्ये नवरत्नविराजित नवखण्ड भयश्वेतद्वीपाय नमः। तत्रेश नादिपृष्ठ सुप्तादक्षिण्येन मध्ये च पुष्परागरत्न खण्डाय ईशाने नील रत्न खण्डाय पूर्वे वैदूर्यरत्नखण्डाय अस्येया विद्‌मरत्न खण्डाय दक्षिणे मौक्तिके रत्न खण्डाय नमः। नैऋत्ये मरकत रत्नखण्डाय पश्चिमे वज्ररत्न खांडाय नमः। वायव्ये गोमेधरत्न खांडाय उत्तरे एतन्मध्ये पद्मरागरत्नखांडाय तन्मध्ये वत्सुर्वणायर्वताय नमः तदुपरि नंदनोद्यानाय तन्मध्ये पद्मवनाय तन्मध्ये चित्ररत्नखचित भूमिकायै तन्मध्ये महासहस्तंभान्वित मध्यस्तंभविवर्तित चतुः पंचाशद्योजन विस्तीर्णा नाना रत्नखचित मणिमंडपाय तन्मध्ये नवरत्नमय वेदिकायै तदुपरिमध्ये रत्नसिंहासनाय तदुपरि उच्चैः श्वेत छत्राय नमः। ततः पीठस्य कल्पित अग्निकोणादिषु धर्माय नमः। ज्ञानाय वैराग्याय ऐश्वर्याय कल्पित पूर्वादिषु अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्याय सिंहासनमध्ये अं अनन्ताय पं पद्मासनाय। आनन्दकन्दाय सां विन्नालाय। सहस्त्र दल कमलाय। प्रकृतिमय पत्रेभ्यो। विकृतिमय केसरेभ्यो नमः? पंचास द्विजावीजाढ्य सर्व तत्वरुपायै कर्णिकायै कर्णिकोपरि। ॐ अर्कमंडलाय नमः। सं सोम मंडलाय। रं वह्निमंडलाय। तं तमसे। रं रजसे। सां सत्वाय। विद्या तत्वाय। कलातत्वाय परमात्मने माया तत्वाय। परतत्वाय नमः। ॐ ह्लीं हौं नमः। शिवाय सर्व संत्रासनाय नमः। अं आं इत्यादि दीक्षांतमुच्चार्य शिव शक्ति सदा शिवेश्वर शुद्ध विद्यामाया कलाविद्यारागकाल नियति पुरुष प्रकृति अहंकार बुद्धि मनस्त्वचच्छक्षुः जिह्वावाक्याणिपादपायूपस्थस्य शब्द स्पर्शरूपरस गंधाकाश वायु सलिल पृथिव्यात्मने श्री योगपीठाय नमः। ततोष्ट पत्रेषु। वामायै नमः। ज्यैष्ठायै। रौद्र्यै नमः। कात्यै। कलाविकरण्यै। बलविकरण्यै। बलप्रमथिन्यै। सर्व भूमिन्यै। ॐ नमो भगवते सकल गुणात्मशक्तियुक्तायानंताय योग पीठात्मनं नमः। इति

पीठ मंत्रः। मूलमंत्रेण संकल्प्यावाहयेत्—मूलेन सुषुम्ना या हृदयस्थं ज्योतिर्वा-मनासयानिःसार्य करस्थं पुष्पे सुस्थितं ध्यात्वा आवाहयेत्। आत्मसंस्थमंजु शुद्धं त्वामहं परमेश्वरः अरण्यामिवह व्यांशंमूर्ता वाह्याम्यहम्। इतिमूलेन नवमुद्रा प्रदर्श्य मंत्र न्यासं खड्गं च कृत्वा प्राणप्रतिष्ठां कृत्वा स्वागतं सुस्वागतमि-त्युदीरयेत। नमोंतेन पादार्घ्यं दद्यात्। तत्रश्यामाकव्दूर्वाकमलं शिवक्रान्ता निक्षिप्य एवं पाद्यार्घ्याचमनीयमधुपर्कं ध्यानं च कृत्वा देवस्य शरीरे मूलपुटितमातकाक्षरैः संपूज्यमातृकरस्थलेषु धूपदीपनैवेद्यानि दत्वा पुष्पांजलित्रयं दद्यात् मूलेन पश्चादा-वरणं पूजयेत। ब्रह्मान्यै नमः। माहेश्वर्यै। वैदनव्यै वाराहै। नरसिंह्यै। ईशान्यै। चामुंडायै। महालक्ष्म्यै नमः। प्रथमावरणम्। असितांग भैरवाय नमः। रुद्र भैरवाय नम;। चंडभैरवाय। क्रोध भैरवाय। उन्मत्त भैरवाय। कपाल भैरवाय भीषण भैरवाय। संहार भैरवाय नमः। द्वितीयावरणम्। लं इंद्राय नमः। रं अनुनये। मं यमाय। खं नैऋत्ये। वं वरुणाय। पं वायव्यै। कुं कुवेराय। हं ईशानाय। अं अनन्ताय सं सोमाय नमः। इति तृतीयावरणम्। वज्राद्यैषष्टम्। इत्यावरणानि संपूज्य नैवेद्यं पुष्पांजलित्रय दत्वा यथाशक्ति मूलमंत्रं जप्त्वा संहार मुद्रया विसर्जयेत्। शैवमुद्रा पंचमुष्टिन्शारंग लिंग योनि पंचमुद्राः। इति शंखमुद्रा गुरुमुखे ज्ञातव्या। ईशान तत्पुरुषाघोर वामदेव सद्योजातः पंचन्वहम् त्रिशक्ति प्रतिष्ठा विद्या: शान्ति। शांत्वतीताः।

इति श्री रुद्रयामल तंत्रेऽघोर सहस्त्राख्ये कल्पेऽघोर पूजायपद्धतिः सम्पूर्णाः। श्रीविनायकधर द्विवेदेन लिखितं भाद्रशुक्ले गुरौषष्ठी सं १९३२ निभाडजेल।

—

कालाग्निरुद्रकवचम्

श्री गणेशाय नमः। अथ कालाग्निरुद्रक्षवन्तं। सनत्कुमारं प्रपच्छ अधिहि भगवान त्रिपुण्ड विसतत्वम्। किं द्रव्या किं स्थानं किं यत्प्रमाणं। का रेखा। किं मंत्रम्। का शक्तिः। किं दैवतम्। कः कर्त्ता। किं फलमिति। तं होवाच। भगवान यद्द्रव्यं तदाज्ञेयं। भस्मानि सद्योजातादि वंच ब्रह्ममंत्रैः। कर्त्तव्यः ॐ श्री कालाग्निरुद्र मंत्रस्य। श्री सदाशिव ऋषिः। शिरसि गायत्री छंदः। मुखे श्री कालाग्निरुद्रोदेवता। हृदि ह्रां वीजं सः शक्तिः। सोहं कीलकं। मम चतुर्विध पुरुषार्थ सिद्धयर्थं जपे विनियोगः। इति ऋष्यादि अथ कर षडंग न्यासः। ॐ ह्रां हैं सां अंगुष्ठाभ्याम्। ॐ ह्रीं हं सिं तर्जनी०। ॐ ह्रूं हं सु मध्यमा। ॐ ह्रैं हं सैं अनामिकाभ्यम्। ॐ ह्रौं हं सौं कनिष्ठि०। ॐ ह्रः हंसः करतलकर-पृष्ठाभ्यां। एवं हृदयादि। ॐ ह्रां हं सां हृदयाय। ॐ ह्रीं हंसी शिरसे। ॐ ह्रूं हंसू शिखाये। ॐ ह्रैं हं सैं कवचे। ॐ ह्रौं हंसौ नेत्रेत्र०। ॐ ह्रं। हंसः। अस्त्राय फट। ॐ प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता। ॐ बीजम्। हं शक्ति। मं कीलकम्। विंदुनाणैति त्रिप्रकार ज्योति मम सर्वकर्मारंभे प्रणायामे विनियोगः। अथ ध्यानं। त्रिनेत्रं त्रिष रौद्रं त्रिहस्तगं त्रिपादवह्नि नयनां भस्म-कुंडेति विग्रहः। तांडवाडांबर धरं वपुषापरिशोभितः।

रुद्रमंत्रेश्वरं देवं ध्यात्वा ध्यात्वा शान्ति लभेन्नरः एवं ध्यात्वा विशेषेण भस्मनोधारणं कुरु।

ॐ श्री दनांदिकेश्वराय नमः

वन्दितासि सुरेन्द्रेण ब्रह्मयाशंकरेण च
अतस्त्वां पाहिनो देवि विभूतिभूति नो भवेत।

ॐ अग्निर्भूतिभस्म। ॐ जलमिति भस्म। ॐ वायुरिति भस्म। ॐ व्योमिति भस्म। सर्व हवाइदं भस्मेति। आयुषं जमदग्नेस्त्रायुणं। कश्यपस्त्र्यायुणं जमदग्ने-स्त्र्यायुषं यद्देवानां अयुष तन्मेअस्तु आयुणं मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्रे पुरीरिषः मानो वीरान् प्रमादिनोऽवधीहः हविष्मन्तः सदन्त्वा हवामहे।

त्र्यवकं यजामहे सुगन्धि पुष्टिवर्द्धनम्। उर्वारुकमिव वन्धनान्मृत्यो र्मुक्षीयमा-मृतात। भस्म वामकरतले गृहीत्वा दक्षिणेनादाय—इत्यसमिम् त्र्या अंबुमेलन। भस्मावलोकनम्। ॐ नमो भगवते ब्रह्मणे नमः। यं रं लं वं हं इत्यभिमंत्र्ये तत्पुरुणं चिन्तयेत्। ॐ तत्पुरुषाय विद्महे। महादेवाय धीमही तन्नो रुद्रः प्रचोदयात्।

इतिमुखमध्ये। ईशान मंत्रस्य ईशान ऋषिः। जगती छंदः। ईशान रुद्रोदेवता। ईशानरुद्र प्रसाद सिद्धयर्थे जपे विनियोगः। ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा। शिवो मे अस्तु सदाशिवो। इति शिरसि। ॐ अघोरमंत्रस्य अघोर ऋषिः। अघोररुद्र प्रसाद सिद्धयर्थे जपे विनियोगः। अघोरेभ्यो घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यो सर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररुपेभ्यः। इति कंठ पुरुषे तत्पुरुषाय वि०। नाभौ। ॐ वामदेव मंत्रस्य। श्रीवामदेव ऋषिः। अनुष्टुप छंदः। श्रीवामदेव रुद्रो देवता। श्रीवामदेव रुद्रप्रसाद सिद्धयर्थे जपे विनियोगः। ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो, रुद्राय नमः कलाय नमः। कलाविकरणाय नमो। वलविकरणाय नमो। वलाय नमो। व्रत प्रमथनाथाय नमः। सर्वभूतदमनाय नमो मनोन्मथाय नमः। ॐ सद्योजातमंत्रस्य। सद्योजात ऋषिः। सद्योजात रुद्रदेवता। पंक्तिछन्दः। सद्ययोजात प्रसादसिद्धयर्थेजपे विनियोगः। ॐ सद्योजातं प्रपद्य भि सद्योजातवै नमो नमः। भवेभवेनातिभवेभवस्व मां भवोद्भवाय नमः। इति सर्वांगे। ॐ ईशाय नमः। शिरसि। ललाटे। तत्पुषाय नमः। मस्तके। अघोराय नमः। कंठे। हृदये वामदेवाय नाभि०। ॐ सद्योजाताय०। बाहवो। ॐ त्र्यम्बकायै। कर्पूरद्वये। भृडाय०। मणिबंधे। ॐ हराय०। अपरस्कन्धे। ॐ जटाधराय। पृष्ठे। त्रिनेत्राय। नेत्रे। श्री सदाशिवाय०। सर्वांगे। पुनर्विभूतिसंगृह्य। अथामित्र्यं। ॐ नमो श्री महरुद्राय पंचमुखत्रिनेत्राय। वृषवाहनाय विरुपाक्षाय गौरिवल्लभाय। आयुध हस्ताय। सर्वभूषणाय। गज चर्मपरिधानाय। विश्वेश्वराय। त्रिपुरांतकाय। ॐ ह्रों मौं ह्रां श्रीं सर्वदुष्टान मर्दय मर्दय द्वेषिणोमुच्चाटय भूतपि नूगचान् नाशय नाशय राजद्वारं विवादद्वारं जनद्वारं वशं कारय कारय महादुर्गमं रक्षम रक्षम। हुं हुं हुं फट् स्वाहा। इति मन्त्रेणभस्मैः भूमध्ये तिलकं धृत्वा। तस्य प्रभावं सर्वेश्वरो भवेत्। सर्वसौख्यं भवति इति भस्मप्रयोगं —

एतानि तानि शिव मंत्रपवित्रतानि
भस्मानि कामदहनानि विभूषणानि
त्रिपुंडकानिरचितानि ललाट पट्टे
लुंपंति दैव क्ति भूवेतानि निपऽक्षणानि
श्री वरं च पवित्रं च रोग दोष निवारणम्
लोकेवशीकरं पुंसां भस्मत्रैलोक्यपावनम्।
रुद्राक्षधारणं कृत्वा भस्मं धृत्वा प्रमंजकम्
स एव शंकरः साक्षात् शिवलोके च जायते।
तस्यदर्शन मात्रेण दग्धे पापं विनश्यति
व्रह्महनं च सुरापीवा गोहनं तस्कर घातकी
मातृपितृ गुरुस्वामिन् तत्पापं जायते सकृत्।
सर्वतीर्थ फलं तस्य सर्वक्षेत्रक०।

अघोर स्तोत्रम् (रुद्रयामल तन्त्रे)

श्री भैरव उवाच ।

कैलाश शिखरासीनं भक्तानुग्रहकाम्यया ।
प्रपच्छ प्रणता देवि भैरवं विगताभयम् ।।
ब्रह्मादि कारणातीतं स्वशक्त्यानन्द निर्भयम् ।
नमामि परमेशानं स्वच्छंदं वीर नायकम् ।।

। श्री देवी ।

प्रायश्चितेषु सर्वेषु समयोल्लांघनेषु च ।
महाभयेषु घोरेषु तीव्रोपद्रव भूमिषु ।।
किलस्थानेषु सर्वेषु उपाय वद मे प्रभो ।।
ये नायासेन रहितो निर्दोषश्च भवेन्नरः ।।

। श्री भैरवः ।।

शृणु देवी परं गुह्यं रहस्यं परमाद्भुतम् ।
सर्वपापप्रशमनं सर्व दुःखा भयप्रदम् ।।
प्रायश्चित्तेषु सर्वेषु तीव्रेष्वपि विशोधनम् ।
सर्वछिद्रापहरणं सर्वार्ति विनिवारणम् ।
समयो समयोल्लांघने घोरे जपादेव विमोचकम्
भोगमोक्ष प्रदं चैव सर्वसिद्धि फलावहम् । १० ।।
शतजाप्येन शुद्धयन्ति महापातकिनोऽपि ये ।
तद्दर्थं पातकं हंति तत्पादेनोघातकम
कायिकं वाचिकं चैव मानसं स्पर्श दोषजम् ।।
प्रमादादिघ्या वापि सकृत् जाप्येन शुद्धयति ।
यागारंभे च यागांते पठितव्यं प्रयत्नतः ।
नित्यनैमित्तिकं काम्ये परस्याप्यात्मनोपिना ?
निछिद्रकरणं प्रोक्तमभावपरिपूरकम् ।
द्रव्यंहीने मंत्रहीने ज्ञानयोगबिवर्जितै ।
भक्तिश्रद्धा विरहिते शुद्धि शून्ये विशेषतः ।
मनोविक्षेप दोषे च विलोमे पशुवीक्षिते ।।
विधिहीने प्रमादे च जप्तव्यं सर्व कर्मसु ।
नातः परतरो मंत्रो नातः परतरास्तुतिः ।
नातः परतरा काचित्सम्पक्तं त्यगिराप्रियें ।।

इदं समय विद्यानां राजराजेश्वरी ।
परमाध्यायनं देवि भैरवस्य प्रकीर्तितम् ।
प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्द्धनम् ।।
स्तवराजमिमं देवि शृणुष्वावहिताप्रिये ।।
ॐ नमः परमाकाशशायिने परमात्मने
शिवाय परमशान्ति निरानन्द पदायते ।
अवाच्यायाः प्रमेयाय प्रमाणे विश्वहेतवे ।
महासामान्यरूपाय सत्तामात्रैक रुपिणे ।
घोषादि दशधा शब्द वीजभूताय संभवे ।
नमः शांतोग्र घोरादि मंत्र संरंभ गर्भिणे ।।
रेवती श्रग विश्रंम समश्लेष्म विलासिने ।
नमः समरसास्वाद पंग नंदोपभोगिने ।
भोगपाराये नमस्तुभ्यं योगी शत्रु जितात्मने ।
द्वनिर्मूलनोद्योग समुध्वासित मूर्त्तये ।
हर प्रसर विक्षोभ विस्पष्टाक्षर मूर्त्तये ।
नमोमाप्य स्वरूपाय स्थानवे परमेष्टिने ।। १४ ।।
घोरसंसार संभोग दायिने स्थितिकारिणे ।
कालादि क्षिति पर्यन्त पालिने विभवः नमः ।
रोहणाय महामोहं ध्वान्तविध्वंसहेतवे ।
हृदयांबुज संकोच मेदिने शिवमानवे ।
भोगमोक्ष फलप्राप्ति हेतु योग विधायिने ।
नमः परमनिर्वाणदायिने चन्द्रमौलये ।
घोषाय सर्वमन्त्राणां सर्वागमय मूर्त्तये ।।
नमः शर्वाद सर्वाय सर्वथापापहारिणे ।
रवरणाय रवताय नमोन्तरा वराविणे ।
नित्याय सुप्रबुद्धयाय सर्वाहर तमाय च ।
घोषायाप(द)न दन्ताय चराय खचरायते ।
नमो वाक्पतये तुभ्यं भोगायधररूपिणे ।
रवणाय रतांशार्द्ध देहिने चित्त कर्मणे ।
नमः शैलसुतामत्रै विश्वकर्त्रै महात्मने ।।
नमः मारप्रतिष्ठाय सर्वान्त पदगयते ।
नमः समस्त तत्वादि व्याधिने चित्स्वरूपिणै ।
रेव द्वाराय रुपाय नमस्ते रुपरुपिणें
परापर परिस्पंद मांहेरापनमोस्तुते ।

भरिताखिल विश्वाय योगगम्याम योगिने
नमः सर्वेश्वेरशाय महाहंसाय संभवे।
चर्व्याय चर्वणीपाय चर्वकामं चराय च।
रवीन्दु संनिध सन्साय महाचक्रायतेनमः।
सर्वान् स्यूत रुपाय सर्वाद्यादक शक्तये।
सर्वभक्षाय शर्वाय नमस्ते सर्वरुपिणे।
रम्याय वल्लभाक्रान्त देहार्द्धाय विनोदिने।
नमः प्रसन्न दुष्प्राप्य सौभाग्य फलदायिने।
तन्महेशाय तत्वाय वेदिने भवभेदिने।
महाभैरवनाथाय भक्ति गम्यायते नमः।
भक्ति गर्भप्रवोधाय शरण्माय शरीरिणे।
शान्ति पुष्ट्यादि साध्याय साधकायनमोनमः।
रवत्कुंडलिनी गर्भ प्रबोध प्राप्त शक्तये।
तत् स्फोटन पटुप्रोद परमाक्षर रुपिणे।
समस्त व्यस्त संगस्त रश्मि जलो दयात्मने।
नमस्तुभ्यं महासेन रुपिणे विश्वगर्भिणे।
रेवाख समुद्भूत वह्नि ज्वाला वभासिने।
घनीभूत विकल्प्यांध्वः विश्वविलापिने।
भोगिनी स्यंदनारुढ़ प्रोदमाल वु गर्विणे।
नमस्ते सर्वभक्षाय परमाभृत लोभिने।
नभकोटि समादेश भरिताखिल सृष्टये।
नमः शक्ति शरीराय कोटि द्वितय संगिने।
महामोह समाक्रान्त जीववर्ग विवोधिने।
महेश्वराय जगतां नमः कारण वंधवे।
स्तेनोन्मूलनदक्षैकजितये विश्वमूर्त्तये।
नमस्तेस्तु महादेव नाम्ने परसुधात्मने।
रुग्लाविणे महावीर्य रुरुवे सविनाशिने।
रुद्राय द्राविता शेष वंधनाय नमोनमः।
द्रवत्पर रसास्वाद चर्वणो द्युक्तये नमः।
नमस्त्रिदश पूज्याय सर्वकारणहेतवे।
रुपातीत नमस्तुभ्यं नमस्ते वहुरुपिणे।
अंविकाय त्रिधामान्त श्वारिणे च त्रिवक्षुषे॥
पेशलोपाय लभ्याय भक्तिभाजा महात्मनां।

दुर्लभाय महाक्रान्त चेतसां तु नमोनमः ।
अणूनां मुक्तये घोर घोर संहारदायिने
घोरातिघोर मूढानां तिरस्कर्त्ते नमोस्तुते ।
इत्येवं स्तोत्र राजेदं महाभैरव भाषितम्
योगिनीनां परं सारं न देयं यस्य कस्यचित् ।
अदीक्षिते शठे क्रूरे निःसत्ये शुचिर्वजिते ।
नास्तिके चपले मूर्खे प्रमत्ते विप्लुते रसे ।
गुरुशास्त्र सदाचार दूखके कलह प्रिये ।
तिर्दये कुवेक क्षुद्रे समयघ्नेथ दांभिवो ।
दाक्षिणाय रहिते पापे धर्म हीनेथ गर्विते ।
पशूनां सन्निधौ देवि नोच्चार्य सर्वथा क्वचित् ।।
अस्य संस्मृत मात्रस्य विघ्नान नश्यन्ति सर्वशः ।
मुह्यकायातुधानाश्च वेताला राक्षसादयः ।
डामराश्च पिशाचाश्च क्रूर सत्वाश्च पूतनाः ।
व्याधि दुर्भिक्ष दौर्भाग्य मारीमोह विषादयः ।
गज व्याघ्रादयो दुष्टाः पलायंति च सर्वशः ।
सर्वे दुष्टाः प्रणश्यन्ति इत्याज्ञा परमेश्वरी ।।४६।।

इति श्री अघोर स्तोत्रं समाप्तम् । इति श्री रुद्रयामल तन्त्रे श्री भैरवी संवादेऽघोर पचांग समाप्तम् ।

आश्विने असितेपक्षे शनौ प्रतिपदातिथि चन्द्रे त्रिनन्द मेकस्यात्सम्मते विकमांकितः खण्डवा स्थानेजेलखाने लिखित्वा विघ्ननायकः श्री स्वागुरवे समर्पितम् ।

अघोर कवचम् (रुद्रयामले)

अथघोर कवच लिख्यते । श्री भैरवी उवाच ।
भगवन्करुणां भोघे शास्त्रांभोनिधिपारगः ।
पुरास्माकं वरोदत्तस्तं दातुं मे क्षमो भव । १ ।

श्री भैरवोवाच ।

सत्यं पुरा वरोदत्तो वरं वस्य पार्वती ।
यत्किंचिन्मनसष्टीं स्यात्तदा तं ते क्षमोस्म्यहम् । २ ।

श्री देवी उवाच ।

अघोरस्य महादेव कवचं देवदुर्लभम् ।
शीघ्रं मेघया ब्रूहि यद्यहं प्रेयसी तव । ३ ।

श्री भैरव उवाच ।

अघोर कवचं वक्ष्ये महामंत्र मयं परं
रहस्यं परेमें तत्वं नचाख्येयं दुरात्मने । ४ ।

अस्य श्रीअघोर कवचस्य महाकाल भैरव ऋषिः अनुष्टुप्छंदः श्री कालाग्नि रुद्रो देवता क्ष्मीं वीजं क्ष्मां शक्तिः क्षमः कीलकं श्रीअघोरविद्या सिद्धयर्थं कवचपाठे विनियोगः अथमंत्रः अघोरेभ्योथ घोरेभ्योघोरघोर तरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररुपेभ्यः ॐ अघोरो शिवः पातु श्री मे घोरललाटकम् ह्लीं घोरो मेवतांन्नेत्रे क्लीं घोरो मेवाताच्छुती । ५ । सौस्तरेभ्योवतांगडोक्षा नासां पातु सर्वतः क्षं मुखं मे पातु मे शर्वो घोरः सर्वोवताद्जलम् । ६ । घोर श्वमेवतात्स्कंधौ हस्ती ज्वलन्नामोवतुज्वलनः पातु मे वक्षः कुक्षि प्रज्वल रुद्रकः । ७ । पार्श्वौ प्रज्वल रुपेभ्यो नाभिर्मे घोर रूप धुके शिघ्नं मे शूलपाणि श्वगुह्यं रुद्रः सहावतु । ८ । कठिं मेमृत मुर्तिश्च मेढ्रे व्यान्नीलकंठकः ऊरू चन्द्रजटः पातु पातु मे त्रिपुरांतकः । जंघे त्रिलोचनः पातु गुल्फौ यांज्ञय रूपवान् अघोरोघ्रीच मे पातु पादौ मे घोर भैरवः । १० । पदापिघोर पर्यन्तमघोरात्मा शिवोवतु शिरसः पादपर्यंत पायान्मे-घोरभैरवः । ११ । प्रभाते भैरवः पातु मध्याह्.ने वटुकोवतु संध्यायां च महाकालो-निशायां कालभैरवः । १२ । अर्द्धरात्रे स्वयं घारोनिशांते मृत रूपधृत पेर्वू मां पातु ऋग्वेदो ययुर्वेदस्तु दक्षिणे । १३ । पश्चिमे सामवेदो व्यादुत्तरेऽथर्ववेदकः । आग्नेय्या-मग्निख्यान्मां नैऋत्यां नित्यचेतनः । १४ । वायव्यारौद्ररूपोऽव्यादेशान्यांकालशा-सनः । १५ । ऊर्द्धेव्यादूर्ध्वरेताश्च पाताले परमेश्वरः । १६ । दशदिक्षु सदापाया-द्देवः कालाग्निरुद्रकः । अग्नेर्माम् पातु कालाग्निः वायोः मां वायुभक्षकः । १७ ।

जलदौर्वामुखः पातुर्पथिमां शकरोऽवतु। विषरायं योगधोगोव्या गच्छतं वायुरूपमृत। गृहे शर्वः सदापातु वहिः पायाद्वृषध्वजः। सर्वत्र सर्वदा पातु मां घोरोथ घोरकः। १८। रणे राजकुले दूर्गे दुर्भिक्षे शत्रु संसदि द्यूतेमारी भये राष्ट्रे प्रसये वादिनां कुले। १९। अघोरेभ्योऽथघोरेभ्यो मावतान्माघोर भैरवः। घोर घोर तरेभ्यो मां पायान्मन्मथसंगरे सर्वतः सर्व सर्वेभ्यो भोजना वसरेवतु।

नमस्ते रुद्ररुपेभ्यो वतु मां घोर भैरवः।
सर्वत्र सर्वदा कालं सर्वांग सर्वभीतिषु।
हं यं रं लं वं शं षं सं हं लं क्षः घोरकः। २२।

अघोराख्याय कहयातु अघोरी मा सभैरवः।
विस्मारितं च तत्स्थानं स्थलं यन्नामवर्जितम्। २३।
तत्सर्वक्षमम घोरो व्यात्साथ घोरः सभैरवः।
भार्यापुत्रान्सुहृद्वर्गान् कन्यां यद्वस्तु मामकम्। २४।
तत् सर्वं पातु मे नित्यं अघोरोक्षमाथघोरकः
स्थाने स्तवे जपे पाठे होमे मेव्यात्क्षः अघोरकः।
अघोरेभ्योथघोरेभ्यो घोरघोरतेरभ्यः सर्वतः।
सर्व सर्वेभ्यो नमस्तेरुद्र रूपेभ्यः। ऊं श्रीं ह्रीं क्लीं
सौः क्ष्मां पातु नित्यं भां श्रीअघोरकः।
इतीदं कवचं गुह्य त्रिषुलोकेषु दुर्लभम्।
मूलमंत्रमयं दिव्यं त्रैलोक्ये सारमुत्तमम्।
अदातव्यमवाच्यं च कवचं गुह्यमीश्वरी।
अपृष्टव्यं भस्तोतव्यं दीक्षाहोने न मंत्रिणा
अदीक्षिताय शिष्याय पुत्राय शरजन्मने
न दातव्यं न श्रोतव्यमित्याज्ञा मामकीं शृणु।
पर श्री महिमानं च शृणु वास्यसु वर्भणः।
अदीक्षितो यदा मंत्री विद्या गृध्नुः पठेदिदम्
सदीक्षित इत्रि ज्ञेयो मान्त्रिकः साधकोत्तमः।
यः पठेन्मनसातस्य रात्रौ ब्राह्मे मुहुर्त्तके
पूजाकाले निशीथे च तस्य हस्तेष्ट सिद्धयः।
दुःस्वप्ने वंधने घोरे कांतारे सागरे भये
पठेत्कवच राजेन्द्रं मंत्री विद्यानिधि प्रिये।
सर्वतः प्रशमंयाति भयं कवच पाठनात्
रजः सत्वतमोरुपमघोर कवचं पठेत्।
वांछितं मनसा यद्यत्तत्प्राप्नोति साधकः

कुंकुमेन लिखित्वा च भूर्जत्वचिरवौशिवे
केवलेन सुभिक्ष्ये च धारयेन्मूध्नि वा भुजे
यद्यदिष्टं भवेत् तत् तत् साधको लमते चिरात् ।
यद् गृहे घोर कवचं वर्तते तस्य मन्दिरे
विद्या कीर्तिर्धनारोग्य लक्ष्मीवृद्धिर्न संशयः ।
विनावलिं न संरक्ष्यं कवचं साधकोत्तमैः
नो चेद्रक्षंतु तान्दारानायुर्भक्षति योगिनी ।
वलिं दत्वा पठेद्धर्म धारयेन्मूध्निसाधकः
इह भोगान समध्नाति परे मुक्तो भविष्यति ।
जपेच्चाघोर विद्यां यो विनानेनैववर्मणा
तस्य विद्या जपं हीनं तस्माद्धर्म सदापठेत्
अघोरमन्त्रविद्यापि जपस्तोत्रं तथामनुम्
सद्यः सिद्धि समायाति अघोरस्य प्रसादतः ।
इति श्री देव देवेशि अघोर कवचं स्मरेत्
गोप्यं कवचराजेन्द्रं गोपनीयं स्वयोनिवत् ।

—

अघोर सहस्त्रनाम (रुद्रयामलतन्त्रे)

अथाघोर सहस्त्रनाम लिख्यते श्री भैरवी ऊँ श्रीं ह्रीं क्लीं सौः क्ष्मीं घोर घोराय ज्वलज्वल प्रज्वल अघोरास्त्राय झ(फ)ट् स्वाहा इति मूलम्—

भगवन्सर्वधर्मज्ञ विश्वाभयवरप्रदः
सर्वेश सर्व शास्त्रज्ञ सर्वातीत सनातन। १।
त्वमेव परमं तत्वं त्वमेव परमं पदं
त्वत्तोप्यन्नयं न पश्यामि सारं सारोत्तमोतमम्। २।
पुरास्माकं वरोदत्तो देवज्ञानवसंगरेतदद्य
कृपया शंभो वरं नाथ प्रयच्छ मे। ३।

श्री भैरवः

भैरवी प्रेयसि त्वं मे सत्यं दत्तो वरोमया
यद्यद् मनसाभीष्टं तद्वाचस्व ददाम्यहम्। ४।

श्रीदेवी

श्री शिवः परमात्मा च भैरवो घोर संज्ञकः
त्रिगुणात्मा महारुद्रस्त्रैलोक्योद्धरणक्षमः
तस्य नाम सहस्रं मे वदशीघ्र कृपानिधे।
वरमतेन्महादेव देहि सत्यं महीप्सितम्
अस्माद्वरं न याचेहं देहि चेदस्ति मे दया। ६।

श्री भैरवः

श्रृणुष्वैकान्त भूदेश सानौ कैलाश भभूतः। ७।
देवदानव संग्रामे यत्ते दत्तो वरो मया
वरंतत्ते प्रयच्छामि चान्यद्वरयमे वरम्। ८।

श्रीदेवीः

अतः परं नयाचेहं वरमन्यन्महेश्वरः
कृपया करुणा मोघेवदशीघ्रं सुरार्चितः। ९।

श्री भैरवः

तव भक्त्या ब्रवीम्यद्य अघोरस्य महात्मनः
नाम्ना सहस्रं परमं त्रैलोक्योद्धारणं क्षमम्। १०।
नातः परतरःविद्या नातः परतरस्तवः
नातः परतरं स्तोत्रं सर्वस्वं मम पार्वति। ११।
अकारादि क्षकारान्ता विद्यानिधिमनुत्तमम्
वीजमंत्रमयं गोप्यं गोप्तव्यं पशुसंकटे। १२।

ॐ अस्य श्री अघोर नाम सहस्रस्य श्री महाकाल भैरव ऋषिः पंक्तिछन्दः अघोरमूर्त्तिः परमात्मादेवता। ॐ वीजं ह्रीं शक्तिः कुरु कुरु कीलकं अघोरविद्या सिद्ध्यर्थे जपे पाठे विनियोगः, अथन्यासः। ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां हूं मध्यमाभ्यां ह्रैं अनामिकाभ्यां ह्रौं कनिष्ठिकाभ्यां ह्रः करतलपृष्ठाभ्यां एवं हृदयादि षडंग न्यास। अपि च ॐ नमो भगवते घोराय शूलपाणये स्वाहा हृदयाम नमः रुद्रायामृत मूर्त्तये मां जीवय जीवय शिरसे स्वाहा, नीलकंठाय चन्द्रजटिने शिखायै वौषट्, त्रिपुरांतकाय कवचाय हूं त्रिलोचनाय ऋग्यजुः साममूर्त्तये नेत्राभ्यां वौषट् रुद्रायाग्नि नेत्राय ज्वल ज्वल मां रक्ष मां रक्ष अघोरास्त्राय हूं फट् स्वाहा अस्त्राय फट् इति हृदयादि षडंग न्यासः। एवं करन्यासः भर्भुवः स्वरिति दिग्वंधः।

अथ ध्यानम्

श्री चन्द्रमण्डलगताम्बुज पीतमध्ये देव सुधास्त्रविर्णमिदु कलाधरं च।
शुद्धाक्षं सूत्र कलशामृत पद्महस्तं देवं भजामिहृदये भुवनैकनाथम्। १।

अपि च महाकायं महोरस्कं महादंश महाभुजम्
सुधास्यं शशिमौलिं च ज्वालाकेशोद्र्ध्ववधनम्
नातः परताविद्या नातः परतरस्तवः।
नातः परतरं स्तोत्रं सर्वस्वं मम पार्वति।
अकारादि क्षकारांता विद्यानिधि मनुत्तमम्
वीजमंत्रमयं गोप्यं गोप्तव्यं पशुसंकटे। २।

ॐ अस्य श्री अघोर नाम सहस्रस्य श्री महाकाल भैरव ऋषिः पंक्तिछन्दः अघोरमूर्त्तिः परमात्मादेवता ॐ वीजं ह्रीं शक्तिः कुरु कुरु कीलकं अघोरविद्य सिद्यर्थे जपे पाठे विनियोगः। अथ न्यासः ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां हूं मध्यमाभ्यां ह्रैं अनामिकाभ्यां ह्रौं कनिष्ठिकाभ्यां ह्रः करतलपृष्ठाभ्यां एवं हृदयादि षडंगन्यासः। अपि च ॐ नमो भगवते घोराय शूलपाणये स्वाहा हृदयाय नमः रुद्रायामृतमूर्त्तये मां जीवय जीवय शिरसि स्वाहा नीलकंठाय चन्द्रजटिने शिखायै वौषट्। त्रिपुरांतकाय कवचाय हुं। त्रिलोचनाय ऋग्यजुः साममूर्त्तये नेत्राभ्यां वौषट्। रुद्रायऽग्निनेत्राय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय हूं फट् स्वाहा अस्त्राय फट् इति हृदयादि षडंग न्यासः एवं करयासः भूर्भुवः स्वरिति दिग्वंधः।

अथ ध्यानम्

श्रीचन्द्रमण्डल गताम्बुज पीतमध्ये देवः सुधास्त्र विगमिंदुकलाधरं च।
शुद्धाक्ष सूत्रकलशामृत पद्महस्तं देवं भजामि हृदये भुवनैकनाथम्। ११।

अपि च।

महाकाय महोरस्कं महादंश महाभुजम्
सुधास्यं शशिमौलिं च ज्वालाकेशोद्र्ध्ववंधनम्

किंकिनी मालयायुक्तं सर्पयज्ञोपवीतिनम्
रक्ताम्बरधरं देवं रक्तमालाविभूषितम्
पाद किंकिणि सद्यन्नं नूपुरैरतिशोभिनम्
ध्यानमार्गस्थितं घोरं पंकजासनसंस्थितम्
भजामि हृदये देव देवं चाघोर भैरवम् । १६ ।

इतिध्यानम्

अथ मूलमंत्रः अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्व सर्वेभ्यो नमस्ते रुद्ररुपेभ्यः इति मूलम् । अथाघोराय नमः । ॐ ह्रीं श्रीं क्लीं महारुद्रो ग्लौं गलामघोर भैरव क्षमी कालाग्नि कलानाथ कालकालांतकः कलिः । श्मशान भैरवो भीमो भीतिहा भगवान्प्रभुः । भाग्यहो मुण्डहस्तश्च मुण्डमाधरो महान् । नुग्रानुग्र खोत्युग्रनुग्रतेजा श्वरोमहाः रोगदो भोगदो भोक्ता सत्यः शुद्धः सनातन विश्वरुपो महाकायो महादीप्तिर्मनोन्मनः मान्यो धन्यो यशस्कर्त्ता भर्त्ताहर्त्ता महानिधिः चिदानन्द चिदाकारश्चि पुल्लासश्चिदीश्वरः । चित्यो चित्यों चित्यरुपः स्वरुपो रुपविग्रहो । भतेभ्यो भतभावन ।

चिदानन्दः प्रकाशात्मा सनात्माबोधविग्रहः
हृद्बोधो बोधवाहुद्धो बुद्धिदो बुद्धिमंडनः ।
सत्यपूर्णः सत्यसंघः सतीनाथ समाश्रयः
त्रैगुण्योनिर्गुणो गुण्योग्रणीर्गुण विवर्जितः ।
सुभावः सुभवः स्तुत्यः स्तोता श्रोता विभाकरः
कालकामांधकत्रास कर्त्ताहर्त्ता विभीषणः ।
विरुपाक्षः सहस्त्राक्षो विश्वाख्यो विश्वतोमुखः
चराचरात्मा विश्वात्मा विश्ववोधो विनिग्रहः । २६ ।
सुग्रही विग्रहीवीरो धीर मृतांवरः ।
शूरः शूली शूलहर्त्ता शंकरो विश्वशंकरः ।
कंकाली कलिहाकामी हास हा कामवल्लभः ।
कांतवासी कांतास्यः कांताहृदयधारणः ।
काम्यः काम्यनिधिः कांता कमनीयः कलाधरः ।
कलेशः सकलेशश्च विकलः सकलांतकः ।
शांती भ्रान्तो महारूपो सुलभो दुर्लभाशयः ।
लभ्योनंतो धनाशीनः सर्वगः सामगायनः ।
सरोजनयनः साधु साधूनाम् भयप्रदः ।
सर्वस्तुत्यः सर्वगतिः सर्वातीतोप्यगोचरः ।
गोप्तागोप्त तरोगान तत्परः सतारायणः ।

असह्ययो महाशांतो महाधूर्त्तो महोरगः।
महतीख संतुष्टो जगतीधर धारणः।
भिक्षुः सर्वेष्टफलदो भयानक मुखः शिवः।
भर्गो भागीरथी नाथो भगमाला विभूष। ३३।
जटाजटी स्फुरित्तेजा श्चंडाशुश्चंड विक्रमः।
दंडी गणपतिर्गुण्यो गणनाथो गणाधिपः।
केमलांगोपि क्रूरास्यो हास्योमायापतिः सुधी।
सुखदो दुःखदःदंभो दुर्जयो विजयीजयः।
जयो जयो ज्वलत्तेजो मंदाग्निमंदविग्रहः।
मानप्रदो त्रिजयदो महाकालः सुरेश्वरः।
अभयांको वरांकश्च शशांक भतशेखरः।
लेख्यो लिख्ये विलापी च प्रतापी प्रमथाधिपः।
प्रख्यो दक्षो विभुक्तश्च रुक्षा दक्ष मखान्तकः।
त्रिलोचनस्त्रिवर्गेण त्रिगुणी त्रिजयी तनु।
त्रिपुरेश स्त्रिलोकेशस्त्रिपुरस्त्रिपुरांतकः।
अंवकः स्त्रिगतिः स्वक्षो विशालाक्षो वटेश्वरः। ४६।
वटुः पटुः परं पुण्यं पुण्यदो दंभ वर्जितः।
दंभी विलंभी विस्त्रंभी सरंभी संग्रहीसखा।
विहारी चाररुपश्च हारोमाणिक्य मडितः।
विद्येश्वरो विवादी च वाद भेद्यो विभेदवान्।
भयांतको वल निधि वलिकः स्वर्णविग्रहः।
महासेनो विशाखी च पृषद्की पूतना पतिः।
अनंत रुपोऽनंत श्रीः पष्टिभागो विशांपतिः।
प्रांशुशीताशुमुकुटो निरंशः श्वांसविग्रहः।
निश्चेतनो जगत्राता हरोहरिणसंभृतः।
नागेन्द्रो नागतश्चासा: स्मशानालय चारकः।
विचारो सुमतिः शंभुः सर्वः स्ववोरु विक्रमः।
ईशः शेषः शशी सूर्यः शुद्धसागर ईश्वरः।
ईशानः परमेशान परा परगतिः परम्। ४०।
प्रमोदी विनयी वैद्यो विद्यारागी विलासवान्।
स्वात्मा दयालुर्धनदो धनदार्चनतोषितः।
तुष्टिदः पुष्टिदः स्तातो ज्येष्ठः श्रेष्ठो विशारदः।
चामीकराञ्चयगतः सर्वगः सर्वमंडनः।

दिनेशः शर्वरीशश्च सन्मदोन्मददायकः ।
पुण्येश्वरो विमानस्थो विमान्यो विमनाविधुः ।
विधिः सिद्ध प्रदोदान्तो दातागीर्वाण वंदितः ।
श्रान्तो वो तो विवेकाक्षो दुष्टो भुष्टो निरष्ठकः ।
चिन्मयो वाङ्मयो वायुः शून्य शान्तिप्रदोन्थः ।
भारभृग्दूत भृंगीतो भीमरुपो भयानकः ।
उच्चंड दीप्तिश्चंडाक्षो दलत्केशः स्खलद्गतिः ।
आकारोथ निराकार इलेशा ईश्वरः परः ।
उग्रमूर्त्तिरुत्सर्वेश ऊष्मांशु घृणहाघृणी ।
टुल्लिहस्तो महाशरो लिंग मुर्त्तिर्लल्दृदशः ।
लीलज्योति महारौद्री रुद्र रुद्र जनाशनः ।
एनत्व गासनो घूर्त्तो धूलि रागानुलेपनः ।
ऐं वीजामृत पूर्णागः स्वर्णागः पुण्यवर्द्धनः ।
ओंकारोकाररुपश्च तत्सर्वो अंगनापतिः ।
अः स्वरुपो महाशान्त स्वरवर्ण विभूषणः ।
कामोत्तकः कामदश्चकालीयात्मा विकल्पनः ।
कलात्मा कर्कशांगश्च कारावंध विमोक्षदः ।
कालरूपः कामनिधिः केवलो जगतांपतिः ।
कुत्सितः कनकाद्रिस्थ कामीवासः कालोत्तमः ।
कामोरामाप्रियः कुंतः कवर्णा कृतिरात्मभू ।
खलीनः खलहा हंता खेटेशो मुकुटाधरः ।
खंगेशः स्वर्गधरः खेटः खेचर वल्लभः ।
खगांतज्ञः खगाक्षश्च खवर्णो मृतभंजनः ।
गणेशो गुणमार्गोयो गजराजेश्वरो गजः ।
अगुणः सगुणोग्राम्यो ग्रीवालंकार मंडितः ।
गूढ़ो गढ़ाशयोगुप्तो गणगंधर्व सेवितः ।
घोर नादो घनश्यामो पूर्णातम घुर्घुराकृति ।
घनवाहो घनेशानो घनवाहनपूजितः ।
घनः सर्वेश्वरराजेशो धवर्णात्रियमंडनः ।
चमत्कृतिश्चलात्मा च चलाचल स्वरुपकः ।
चारुवेशश्चारुमूर्त्तिण्चंडेशश्चण्डमूपतिः ।
चिंत्योचित्य गुणातीतश्चितारुपश्चिताप्रियः ।
चित्तेशश्चेतनारुपश्चिता शांता पहारकः ।

छलभृच्छलकृच्छली कत्रिणाद्यकारक: ।
छिन्नग्रीव: छिन्ननाश: छिन्केशश्चिदाकर: ।
जेताजिध्नुरजिघ्नु पूजयात्मा जयमंडल: ।
जन्महाजन्महोजन्तो वृजिनी जृंभनो जती ।
जउहा जडसेव्यश्च जडात्म जडामंडन: ।
जयस्वरुपो जनको जलधिर्ज्वर सूदन: ।
जलंधरो जनाध्यक्षो निराधिराधिरस्मय: ।
अनादिर्जगतीनाथो जय श्री जयसागर: ।
द्रां कारी द्रुलिनी नाथ: सप्रति: सप्तसागर: ।
टंकार संभवो तानुष्टवर्णऽमृत वल्लभ: ।
टंक हस्तो विटंकारो टीं कारो टोट पर्वत: ।
टकारी च त्रय: ठ: रु: स्वरुपो वकुरोवली ।
उकारुी उकृतिर्डवी डिवा नाथो विडंवन: ।
डिल्ली श्चवृहि डिल्लाभो डकाराक्षरमंडन: ।
ढवणी ढल्लि थज्ञेशी ढं वरुची निरंतक: ।
ण वर्णेशो शीनीवासो सारागीराग भूषण: ।
ताम्रापस्तपनस्तापी तपस्वीतपसां निधि: ।
तमोमयस्तमोरुपस्तपसां फलदायक: । ६७ ।

तमीश्वरो महाताली तपीचरक्षयंकर ।
तपोद्योतिस्तपोहीनो वितातीं अंकेश्वर: ।
स्थलास्थ: स्थावर: स्थाणु: स्थिरवुद्धिस्थिरेन्द्रिय: ।
स्थिरंकृती स्थिराप्रीति: स्थितिय: स्थितिवांस्तथा ।
देभी दभ प्रियो दाता दानवो दानवानुनी ।
धर्मा धर्मो धर्म गतिर्धन वान्धन वल्लभ: ।
धनुर्धरो धतुर्धन्यो धीरेशोधीमयो धृति: ।
धकारांतो धरापालो धरणीशो धराप्रिय: ।
धराधरो धरे शानो नारदो नारसोरस: ।
सरसो विरसो नागो नागयज्ञोपवीतवान् ।
नुतिलभ्यो नुतीशानो नुतितुष्टो नुतीश्वर: ।
पीवरांग पराकार: परमेश: परात्पर: ।
परावार: परं शापं परामूर्त्ति: परं पदं ।
परोगम्य: परंतेज: परंरुप: परोपकृत् ।
पृथ्वीपति: पति: पूति पूतात्मा पूतनायक: ।

पादपादद्श्चाच पवनः पवनात्मजः।
प्राणदोपानदः पांथ समानव्यान दोवरम्।
नु उदानदः प्राणगतिः प्राणिनां प्राणहारकः।
पुमान्यदीयान्यरमः परमं धानकः पविः।
रविः पीताननः पीठं पाठीनाकृतिरान्भवान्
पत्रीपीत पवित्रं च पाठनं पाठनः प्रियः।
पार्वतीशः पर्वतेशः पर्वेशः पर्वघाटनः।
फूणी फणीत ईशानः फुल्लहस्तः फणाकृतिः।
फणिहारः फणीमूर्त्तिः फणात्मा फणिवल्लभः।
बली बलि प्रियो बालो बालालापी बलंधरः।
बालको बलहस्तश्च बलिभुग्बालनाशनः।
वलिराज वलिकारी वाणहस्तोर्द्ध्वर्णभू
भद्रीभद्रपदो भास्वान्भामयो भ्रमयोभयः।
भव्यो भाव प्रियो भानुर्भानुमान्भीमनंदकः
भूरि दो भूतनाथश्च भूतलं सुतलं तलम्।
भयहा भावना कर्त्ता भवहा भवघातकः
भवो विभवदो भीतो भूतभव्यो भवः प्रियः।
भवानी शोभगेष्टश्च भगपूजन पूषणः
मकुरोमानदो मुक्तो मलिनो मलिनाशनः।
मारहर्त्ता महोधिश्च महस्वीमहती प्रियः।
मीनकेतुर्महामारो महेष्वा मदनांतकः।
मिथुनेशो महामोहो मल्लो मल्लांतकोमुनिः
मरीचि रुचि मान्योगी मंजुलेशो मराधिपः।
मर्दनो मोहमर्दी च मेधावी मेदिनीपतिः।
महीपतिः सहस्रारे मुदितो मानवेश्वरः।
मौनीमौन प्रियोमासः पक्षीमाधव द्रष्टवान्।
मत्सरी मापतिर्मेषो मेषोपहारतोपिषः।
माणिक्य मंडितो मंत्री मणिपूरनिवासकः।
मंदमुन्मदरुपश्च मेनकी प्रिय दर्शनः।
महेशो मोघरुपश्च मकारामृत दर्शनः।
यज्वा जप अप्रियो यज्ञो यशस्वी यज्ञ भुग्युवा।
योधप्रियो यमप्रियो यामीनाथो यमक्षयः।
याज्ञिको यज्ञमानश्च यज्ञमूर्त्तिर्यशोधरः।

रविस्तनयनोरत्न रसिको रामकेश्वरः
लावण्यं लालसो लूतो लज्जा लुर्तनाप्रियः।
लवमूर्त्तिर्विलंवीच लोल जिह्वे लुलु धरः।
वसुदो वसुमान्वास्तु वाग्म वो वटुकोवटुः।
चीटो प्रियो विटंकीच पीटपीवीहगाधिपः।
विश्वमोदी विनयदो विश्प्रीतो विनायकः।
विनाशंको विनातंको वैमानिक वरप्रदः।
शंभुः शशीपतिः शार समदो वकुलप्रियः।
शीतलः शीत रुपश्च शावरी प्रणतोवशी।
शीतालुः शिशिरः शैत्यः शीतरश्मिः सितांशुमान्।
शीलदः शीलवां शाली शालीन शशिमंडनः।
शंडः शंडः शिपिविष्टः शंष वर्णोज्वल रुपवान्।
सिद्धसेव्यः सितानाथः सिद्धिकः सिद्धिदायकः।
साध्यो सुरालभः सौम्यः सिद्धिभूमिभावनः।
सिद्धान्तवल्लभः स्मेर स्मितवक्त्रः सभापतिः।
सरोधीशः सरिन्नाथः सिताभश्चेतनासमः।
सत्यपः सत्यमूर्त्ति सिंधुराजः सदाशिवः।
सदेशः सदना सूरिः सेव्यमानः सतांगतिः।
सतांभाव्यः सतानाथ सरस्वान्समदर्शनः।
सुसंतुष्टः सतीचेता सत्यवीर सतोरतः।
सर्वाराध्यः सर्वपतिः समपी समयः स्वयम्।
स्वयंभूः स्वयमात्मीय स्वयंभावः समात्मकः।
सुराध्यक्षः सुरपतिः संरोजासनसेचकः।
सरोजाक्षं निषेव्यश्च सरोजदलालोचनः।
सुमतिः कुमतिः स्तुत्यः स्तननायक नायकः।
सुधाप्रियः सुधेशश्च सुधामूर्त्तिः सुधाकरः।
हीरको हीरवांश्चैव हेतु तातक मंडलः।
हाटकेशो हठधरो हरिदल विभूषणः।
हितकृद्धेतु भूतश्च हास्पदो हास्यवक्रकः।
हारोहारप्रियोहारी हविष्मक्षोचनो हरिः।
हाविष्याह विमुग्वहूयो हव्यं हाविर्भुजांवरः।
हंस परमहंसश्च हंसीनाथो हलायुधः।

हरिदश्वो हरितुत्यो हेरंवो लंवितोदरः।
क्षनापतिः क्षमः शांतः क्षुरावीरोक्षिभीमकः।
क्षितिनाथ क्षृणेष्टश्च क्षणवायुः क्षवक्षतः।
क्षणीश्च क्षणिकः क्षामः क्षवर्णामृतपीठकः।
अकारादि क्षकारांता विद्यामाला विभूषणः।
ॐ क्ष्मं महाभैरवीशो ॐ श्रीं भेवयूर्षकः।
ॐ ह्रीं वटुक भावेशो ॐ ह्रीं वटुक भैरवैः।
ॐ क्लीं श्मशानवासी च ऊँ श्मशान भैरवः।
मैमद्र कालिकान्तनाथः कीं हूं ह्रीं कालिकापतिः।
ऐं सौः क्लीं त्रिपुरेशानो ऊँ ह्रीं ज्वालामुखीपतिः।
ऐं क्लीं सः शारदानाथो ऊँ ह्रीं मार्तण्ड भैरवः।
ऊँ ह्रीं सुमंतु सेव्यश्च ऊँ श्रीं क्षीं मत्त भैरवः।
ऊँ श्रीं उन्मत्त वित्तश्च ऊँ श्रीं क्लीं काल भैरवः।
ऊँ श्रीं कठोरदेशश्च ऊँ ह्रीं कठोरभैरवः।
ऊँ श्रींगामांधुकध्वंसी ऊँ श्रीं कामान्ध भैरवः।
ऊँ श्रीं अष्टस्वरश्चैव ऊँ श्रीं अष्ट भैरवः।
ऊँ श्रीं ह्रीं मष्टमूर्तिश्च ऊँ श्रीं उन्मत्तभैरवः।
ऊँ ह्रीं हाटकवर्णश्च ऊँ ह्रीं हाटक भैरवः।
ऊँ श्रीं शिवारुतश्चैव ऊँ श्रीं शासक भैरवः।
ऊँ श्रीं अहं स्वरुपश्च ऊँ ह्रीं श्रीं मुंड भैरवः।
ऊँ ह्रीं मनोन्मनाश्चैव ऊँ श्रीं मंगलभैरवः।
ऊँ श्रीं वह्निमयश्चैव ऊँ श्रीं भैवृद्धभैरवः।
ऊँ श्रीं ऐं क्लीं नागमूर्त्तिः ऊँ श्रीं ह्रीं नागभैरवः।
ऊँ श्रीं क्लीं ह्रीं कूर्ममूर्तिश्च ऊँ श्रीं कूकर भैरवः।
ऊँ श्रीं ह्रीं देवदत्तश्च ऊँ क्लीं श्रीं दत्त भैरवः।
ऊँ ह्रीं श्रीं धनंजयश्चैव ऊँ श्रीं धनिकभैरवः।
ऊँ ह्रीं श्रीं रसरूपश्च ऊँ श्रीं रसिक भैरवः।
ऊँ श्रीं क्लीं ह्रीं स्वरुपश्च उँ श्रीं शाद्विक भैरवः।
ऊँ श्रीं ह्रीं स्पर्शरुपश्च ऊँ ह्रीं श्रीं स्पर्शभैरवः।
ऊँ श्रीं सत्वमयश्चैव ऊँ श्रीं ह्रीं सत्वभैरवः।
ऊँ श्रीं रजोगुणात्मा च ऊँ श्रीं राजसभैरवः।
ऊँ श्रीं तमोमयश्चैव ऊँ श्रीं तापसभैरवः।
ऊँ श्रीं धर्ममयश्चैव ऊँ ह्रीं वैधर्मभैरवः।
ऊँ श्रीं ह्रीं मध्यचैतन्यो ऊँ श्रीं चैतन्यभैरवः।
ऊँ श्रीं क्षीं क्षितिमूर्तिश्च ऊँ ह्रीं क्षात्रिक भैरवः।

ऊँ श्रीं ह्रीं जलमूर्तिश्च उं ह्रीं पीठक भैरवः ।
उं श्रीं हुताश मूर्तिश्च ऊं ह्रीं हां लख भैरवः ।
ऊं श्रीं ह्रीं सोममूर्तिश्च ऊं ह्रीं हालश्च भैरवः ।
ऊं श्रीं ह्रीं सोममूर्तिश्च ऊं श्रीं क्लीं सौम्य भैरवः ।
ऊं श्रीं ह्रीं सूर्यमूर्तिश्च ऊं श्रीं सौरेन्द्र भैरवः ।
ऊं ह्रीं जूं सः हंस रुपश्च हंसजुतं मृत्यंजयः ।
तं चत्वारिंशदधिको ऊं श्रीं अघोरभैरवः ।
अघोरेभ्योवघोरेभ्यो घोरघोरतेरभ्यः ।
सर्वतः सर्व सर्वेभ्यो नमस्ते रुद्ररुपेभ्यः ।
भैरवेशो भयरवदातादेवजनप्रियः ।
ऊं श्रीं ह्रीं क्लीं क्ष्म्यं देवी वैं अघोरदर्शनः ।
ऊं श्रीं सौन्दर्यवान्देतो ऊं अघोरकृपानिधिः ।
इतिनाम्ना सहस्रं तु अघोरस्य जगत्प्रभुः ।
तव भक्तया मयाख्यातं त्रिषु लोकेषु दुर्लभम् ।
अप्रकाशन दातव्यं गोप्तव्यं शरजन्मनः ।
वलं वलप्रदं स्तुत्यं स्तवनीयं स्तवोत्तमम् ।
पठेद्वा पाठयेन्नित्यं ध्यार्यच्चेतसिनित्यशः ।
अदृष्टव्यमदीक्षाय गोप्तव्यं पशुसंकटे ।
नातः परतरं किंचित्सर्वस्वं नास्ति मेहृदिः ।
पुण्यदं पुण्यमात्मीयं सकलं निष्कलं परम् ।
तत्वं परमतत्वं च साक्षादमृतरुपिणम् ।
पठेन्मन्त्रो निशीथे तु नग्नः श्री मुक्तकुन्तलः ।
अनन्तं चित्सुधाकारं देवानामपि दुर्लभम् ।
शक्तयामुक्तो जपेन्नाम्नां सहस्रं भक्तिपूर्वकम् ।
तत्क्षणात् साधकः सत्यं जीवनमुक्तो भविष्यति ।
भौमेर्क शनिवारे तु श्मशाने साधकः पठेत् ।
सद्यस्तस्य स्वयं देवि वरदस्तु भविष्यति ।
दशावर्त्त पठेद्राजौ नदीतीरेषु धैर्यवान् ।
तस्य हस्ते सदासंति अंवकस्याष्ठ सिद्धयः ।
मध्याह्ने शिरात्रौ च निशीथे विविधे पथेत् ।
इन्द्रादयः सुरगणाः वशमेष्यंति नान्यथा ।
गुरौ ब्राह्मे मुहुर्त्ते च पठेद्भक्त्या च साधकः ।
यावदिंद्रः सभामध्ये तदग्रे मूकवद् भवेत् ।

शुक्रेनद्याज जले मंत्री पठेन्नाम्नां सहस्रकम् ।
तदा प्रभृति त्रैलोक्यं मोहमेष्यति नान्यथा ॥
त्रिसंध्योदयकाले तु पठेत्साधक सत्तमः ।
रंभाध्यक्ष रसः सर्वा वशमायांति तत्क्षणात् ।
भौम मध्याह्न समये परेच्च कृषसन्निधौ ॥
सद्योदेवि महातंका रिपुमुच्चाटये ध्रुवम् ।
सद्यस्त्रिवारं पठयेन्नाम्नां सहस्रमुत्तमम् ॥
इह लोके भवेद् भोगी परे मुक्तो भविष्यति ॥
अर्कवारे समालिख्य भूर्ज त्वचि च साधकः ।
कुंकुमालक्तकस्तूरी गोरोचन मनः शिलाः ॥
सर्वाद्यैर्वसुभिर्मजीवेष्टये त्ताग्ररज्जुना ।
घोरयन्मूर्त्ति सद्यस्तु लभेत्कामान्यथेप्सितन् ।
पुत्रां दारांश्च लक्ष्मीं च यशोधर्म धनानिच ।
लभते नात्र संदेहः सत्यमेतद्वचोमम ।
विनानेन महादेवि पठेद्यः कवचं शुभम् ।
तस्य जीवं धनं पुत्रान् दारान् भक्षंति राक्षसाः ।
विनानेन जपेद्विद्यामघोरस्य च साधकः ।
तस्यकोटिजपं व्यर्थ सत्ययेतद्वचोमम ॥
बहुनात्र किमुक्तेन सहस्राख्यं स्तवोत्तमम् ।
यंगृहे वा जपेद्यस्तु श्रावेद्वाश्रृणोति यः ।
स स्वयं नीलकंठोहं तत्कलत्रं महेश्वरी ।
इदं रहस्यं परमं भक्तया तव मयोहितम् ।
अत्यन्त दुर्लभं लोके तथात्यंतं महीतले ।
भूमौ च दुर्लभं देवि गोपनीयं दुरात्मनः ।
अघोरस्य महादेवि तत्वं परं तत्वकम् ।
अतीवमधुरं हृदयं परात्पर रहस्यकम् ।
अप्रकाशमहातव्यमवक्तव्यं दुरात्मने ।
यथेष्ट फलदं सद्यः कलौ शीघ्र फलप्रदम् ।
गोप्यं गुप्ततरं गूढं गुप्तं पुत्राय पार्वति ।
गोपनीयं सदागोप्यं गोप्तव्यं च स्वयोनिवत् ।

इति श्री रुद्रयामले तंत्रे श्री भैरव–भैरवी संवादे **अघोर सहस्रनाम स्तवः** समाप्तः । सं १९३२ भाद्रपद शुक्ल अनन्त चतुर्दश्याम् गुरौ ।

——

अघोरविधि (स्तवकवच)

कोर्थः पुत्रेंणजातेनमानुर्योवनहारिणी आगत्यमानुषेलोकेनदृष्टंश्चमहापथः ।९।
देशाधन्यः पुरीधन्यायत्रायंसाधकोत्तमः यस्यग्रेहे च लिखितंपुस्तकंवर्त्तते शुभं ।१०।
गंगाश्चाः सरितस्तत्र सर्वेतीर्थावसंतिवै तस्मादनेनविधिना श्रृणुयाद्रास मां हितः ।११।
विल्ववृक्षतरोर्मूलेलक्षमंत्रं जपेद्बुधः ततः सिद्धशरी रेसोहिमेनेवप्रहन्यते ।१२।
अघोरान्नापरोमंत्रोमहिम्नोनापरास्तुतिः महेशान्नापरोदेवोनास्ति तत्वंगुरोःपरं ।१३।
अघोरमंत्रतनोनिगुरुवक्तविनिर्गतिं सर्वधर्मार्थकामानांकैवल्यस्यच भाजनं ।१४।
भुक्तिमुक्तिमतस्तस्यस्वर्गस्तस्यगृहंगणे अणिमादिकमैश्वर्य्यंद्वारितस्यच वैभवेत् ।१५।
तस्मात्सर्वंप्रयत्नेनगुरुंयोग्यंसमाश्रयेत् करसंपुटंकृत्वाकुर्याद्विज्ञप्तिमेवच ।१६।
संसारतापसंतप्तमृद्धमाकथंशंकर दुःखां वुधौमांमज्जंतंदत्वाहस्तांवलंवनं ।१७।
समुद्धरमहाप्राज्ञ पाहिमां शरणागतं सर्वस्वंममयत्किंचित्त्वदीयेतन्नसंशयः ।१८।
स्थिरंनचधनंकिंचिन्नस्थिरंदेहयौवनं तस्मात्सोभाधनेनैवनृदेहेचविशेषतः ।१९।
सर्वस्वव्यणकंकृत्वाघोरमंत्रं समाश्रयेत् लक्षमंत्रंजपंकृत्वाहविष्यनिरतः शुचिः ।२०।
व्रह्मचर्यंसमाश्रित्य गुरुभावानतत्परः दशांशं चापिहोमंनः द्दशांशंच तर्प्पणं ।२१।
मार्ज्जनतद्दशांशेन ततोव्राह्मणभोजनं गुरुभ्योदक्षिणांदद्याद्विनशाक्यविवर्ज्जितः ।२२।
शर्यामनोरमांदद्यात्सर्वस्तरण संयुतां पंचपात्रसमायुक्तां धेनुंदद्यात्पयशिवनी ।२३।
मूर्तीशिवस्यकुर्वीतदेव्याचैवविशेषतः दशतोलेप्रमाणेनपंचतोलेनवा पुनः ।२४।
जथाशक्त्याचकुर्वीत यथोयफलभागभवेत् दासीदद्यात्सुरूपांच वस्त्रभूषणसंयुतां ।२५।
सिद्धमंत्रो न हन्येतवह्निवायुहिमादिभिः एवमकृत्वा यो याति तस्य यातोभवेद्ध्रुवं ।२६।
करनीरोपमंह्यायुर्यस्माह्यातिदिनेदिने तस्मात्सर्वप्रयत्नेनस्वमंत्रंसाधयेद्बुधः ।२७।
कैलाशदर्शनंपुण्यंसच देहेनसंशयः येनदेहेनयत्कर्मक्रियतेकर्मकृत्टंभिः ।२८।
तद्देहेतन्नलभ्यंस्यात्कल्पकोटिशतैरपि इदंदेहयुतंनैवकर्मणांलभ्यतेफलं ।२९।
अतोधर्मसमूहेन नैनंधर्मतुलोपयेत् पद्मंत्वष्टदलंकुर्यात्तत्रपूजांसमाचरेत् ।३०।
धारयेत्श्रीशंकरंतत्रपार्व्वतीवल्लभंहरं उपचारैः षोडशकैः सर्वशक्तिसमन्वितं ।३१।
वलिप्रदानंकुर्व्वीतपुनः सर्वजनप्रियं वांछितांलभतेकामान् पुत्रपौत्रसमन्वितः ।३२।
एवंसिद्धेनमंत्रेणसाधयेत्स्वमनोरथां यस्यकोपंसमासाद्यदेवता कंपतेभयात् ।३३।
इंद्राद्यादेवतासर्वे तां नमस्यंतिसाधकं चक्रवर्ती भवेद्भूयोयदिक्षेक्षिववल्लभः ।३४।
एततेकथितंपुत्रमहापंथविचारणं अनित्यमसुखंलोकमिमंप्राप्य भजस्व मां ।३५।
इदं पुत्रतवस्नेहान्महागुह्यंप्रकाशितं नदेयंधनलुब्धेभ्यो न देयंदेवनिंदके ।३६।
नास्तिकेचैवदुर्वुद्धौतथाचुंवकवृत्तये ।३७।

इति श्रीरुद्रयामल्ये अघोरमंत्रसाधनप्रकार संपूर्ण ।

ॐ अस्य श्री अघोरमंत्रस्य अघोर ऋषिः बृहती छंदः कालाग्निरुद्रीदेवता ह्रींबीजंहुंफट्स्वाहाशक्तिः अघोरप्रसादसिद्ध्यर्थेजपे विनियोगः अथकरन्यासः ॐ ह्रांअंगुष्टाभ्यां नमः ॐ ह्रींतर्जनीभ्यांनमः ॐ ह्रूं मध्यमाभ्यां नमः ॐ ह्रैं अनामिकाभ्यांनमः ॐ ह्रौं कनिष्टिकाभ्यांनमः ॐ ह्रः करतलकरप्टष्ठाभ्यांनमः अथ अंगन्यासः ॐ ह्रां हृदयायनमः ॐ ह्रीं शिरसेस्वाहा ॐ ह्रं शिखायै वषट् ॐ ह्रैं कवचायहुं ॐ ह्रौं नेत्रत्रयायवौषट् ॐ ह्रः अस्त्रायफट अथध्यान कैलाशासनमीश्वरंशशिकलंस्फर्ज्जजटामंडलं नासलोकेनतत्परं त्रिनयनंवीरासनध्याश्रितं मुद्राटंककरंच जानुविलसत्पाणिप्रसन्नाननं कक्षवद्धभुजंगमंमुनिवृतं वंदेमहेशंपरं अथ जपमंत्र ॐ हुं फट्स्वाहा अथजपसमर्पणमंत्र ॐ गुह्यात्टगुह्य गोप्तात्वंगृहणास्मत्कृतजपं सिद्धिर्भवतुमेदेवात्वत्प्रसादान्महेश्वरं ।३८। अनेनजपेनरातावत्संख्याकेन श्री अघोररुद्रः प्रीयतां अथस्तोत्रपाठः

ईश्वरोवाच—

ॐ नमः कामरूपाय नमोमोक्षवपुष्टते नमो नादात्मनेतुभ्यं नमोबिंदुकलात्मने ।३९।
नमोस्तु लिंगरूपाय लिंगातीतायते नमः त्वंमातासर्वलोकानां त्वमेव जगतः पिता ।४०।
त्वंभ्राता त्वंसुहृन्मित्रंत्वं प्रियस्त्व पितामहः नमस्ते भगवन्रुद्र भास्करायमिततेजसे।४१।
नमो भवायरुद्रायपरमांवुमयायच शर्वाय शितिरूपायसदासुरभिणे नमः ।४२।
पशूनांपतयेचैव पावकामित तेजसे अतिभीमायसौम्यायअमृतायनमोस्तुते ।४३।
उग्रायययजमानाय नमस्ते कर्मयोगिने पार्थिवानांच लिंगानांयन्मयापूजनंकृतं ।४४।
तेनमेभगवान्रुद्रोवांछितार्थं प्रयछतु इदंस्तोत्रंपठेद्यस्तुपूजाकाले विधानतः ।४५।
चक्रवर्तीभवेद्राजा चांतेशिवपुरंवसेत् ।

इति श्री रुद्रयामले सदाशिवस्तोत्र संपूर्णं आदौपठनीयं ॐ अस्य श्री सदाशिवकवचस्यभृगुऋषिरनुष्टुश्छंदः श्रीसदाशिवो देवता कैलाशप्रीत्यर्थे जपे विनियोगः ।

ॐशिवोमे अग्रतः पातु पिनाकी पातु प्टष्टतः त्रिपुरारिर्वामपार्श्वे दक्षिणेमदनांतकः १।
उर्द्धंपातुविशालाक्षो अधः कनकपिंगलः पार्वतीवल्लभोजानुं जंघेनंदीश्वरः प्रभुः २।
पादौमेपातुसर्वेशः करौकालाग्निसेवकः शीर्षमेपातुसर्वज्ञः कर्णौः देवेश्वरस्तदा ३।
गुह्यंगुह्येश्वरः पातु हृदयंहृदयेश्वरः सर्वांगंसर्वदेवेशः कामिनीवल्लभः कटिं ४।
यदिदं कवचं वत्स देवानामपि दुर्लभं एतस्य पठनादेव भूत-प्रेत पिशाचकाः ५।
न हिंसंति सदादेसयेत्गणाविघ्नकारकाः इदं कवच मज्ञात्वा यस्तु मंत्रं शिवात्मकं ६।
अघोरं जपते वत्स तस्यविघ्ना पदे-पदे तस्मात्सर्वं प्रयत्नेन कवचं भुवि दुर्ल्लभं ७।
सेवनीयं प्रयत्नेन यदीक्षेदात्मनोहितं सर्वरक्षाकरं पुण्यं सर्वपापविनाशनं ८ ।

इति श्री रुद्रयामल्ये शिवमूर्तिक संवादे शिव कवच समाप्तं ।

अघोरमंत्रसाधनप्रकार

श्रीगणेशायनमः । श्रीसरस्वत्यैनमः । श्रीगुरवेनमः । ॐ कैलासदर्शनंपुण्यंसच- देहेनसंशयः येनदेहेनयत्कर्मक्रियतेकर्मकर्तृभिः । १ । तदेहेतत्रलभ्यंस्यात्कल्पकोटि- शतैरपि । इदंदेहेयुतंनैवकर्मणांलभतेफलं ।२। अतोधर्म समूहेननैनंधर्मंतुलोपयेत् । पद्मंत्वष्टदलंकुर्यांमन्त्रपूजांसमाचरेत ।३। ध्यायेच्छ्रींशंकरंतत्र पार्वतीवल्लभंहरं । उपचारैःषोडशकै सर्वशक्तिसमन्वितैः ।४। वलिप्रधानंकुर्वीतपुनःसर्वजनप्रियं । वांक्षि- तांल्लभते कामान्पुत्रंपौत्रसमन्वितः ।५। एवंसिद्धेनमंत्रेणसाधयेस्त्वमनोरथं । यस्यकोपं- समासाद्य देवता कंपतेभयात् ।६। इंद्राद्यादेवतासर्वेतंनमस्यंतिसाधकं । चक्रवर्त्तीभवेद्भू- योर्यदिक्षेक्षिववल्लभः ।७ । ए तत्रैकथितंपुत्रमहापंथाविचारणं । अनित्यमसुखं लोक मिमंप्राप्यभजस्वमां ।८ । इदंपुत्रतवस्नेहान्महागुह्यंप्रकाशितं । नदेयंधनलुब्धेभ्यो नदेयंदेवनिंदके ।९। नाशिकेचैवदुर्बुद्धौतथाचुंवकवर्त्तए ।

इतिश्रीरुद्रजामलेतंत्रअघोर- मंत्रसाधनप्रकारसंपूर्ण ।

ॐअस्यश्रीअघोरमंत्र। अघोरऋषिः । वृहतीछंदः श्रीकायरुद्रोदेवताह्लींवीजं । ह्रूंफट्स्वाहाशक्तिः अघोरप्रसादसिद्ध्यर्थेजपेविनियोगः । अथ करन्यासः । ॐक्लांअंगुष्टाभ्यांनमः । ॐतर्ज्जनीभ्यांनमः । ॐह्लींमध्यमाभ्यांनमः । ॐ ह्लैं अनामिकाभ्यांनमः । ॐ ह्लीं कनिष्टकाभ्यांनमः । ॐ ह्लः करतलकरपृष्टाभ्यांनमः । अथंगन्यासः । ॐह्लांहृदयायनमः ।

अपूर्ण

घोरकालिकाचतुःश्लोकी

श्रीगणेशायनमः कल्पद्रुमेवनेरम्येरत्नसिंहासनोपरि उभयासहितांदेवंपप्रछनंदिकेश्वरः। नंदिकेश्वरउवाच—देवदेवजगन्नाथपृच्छामिपरमेश्वरकेनकालिकरीबुद्धिःप्रकाशंतेमहात्मन। श्रृणुवत्समहाप्राज्ञगुह्याद्गुह्यतरं महत्। चतुःश्लोकीतिविख्यातं वदामि ध्यानपूर्वकम्। कालिकायांश्चतुःश्लोकी ध्यायेत्सिद्धिमनुत्तमम्। निशार्द्धेवाद्दिनार्द्धेवा-श्मशानेशप्तजापकः। क्रीयतेतीर्थसंयुक्तं नित्यंग्रन्थसहस्रधृक्। श्री गुरुं अस्यश्रीदक्षिण-कालिकाश्चंस्य भैरव ऋषिरनुष्टुच्छन्दः श्मशानकालिकादेवता मम्कामनासिद्ध्यर्थे जपेविनियोगः। वामेकर्णशशांचदक्षिणरविर्गण्डस्यलेकुण्डलौतारामौक्तिकहारकण्ठ-शुभगैः केचित्प्रसून्नाइवव्योम्निकुंजरकालिकात्वचघटस्कंधेचविभ्राजते पृष्ट्वा कालिकरालिचर्वतिजगत् श्रीकालिकायैनमः।१। हस्तेदक्षिणचालिपात्ररुचिरंव्रह्माकपा-लीक्लतंवामेषोणितलैंचर्वतिभरान्देवारिदैत्यारिकान् व्रह्मांडोदरकूर्ममध्य च म-धुपानाधर्मतभ्य सदाप्रेतारूढ़महाट्टहाससहितां श्रीकालिकायै नमः।२। कराठे कोटि-कपालभेद्य दर्पा च चर्म्मांवरं व्यालं भूषण भूषित स्तन रुचिं। नीलं घनं राज्यते उर्द्धकेश कृशानु वद्ध भयकरी भीमाति मांसंक्लसाद्य चर्वतपास्थिरिपूनससैन्यम सुरान् श्री कालियै नमः। ३। चामुण्डेकरचंड मुंडा हित्तां चंडाट्टहासैर्युतां दुर्दश्याद्दशनो ज्वलांज्वलनिभांकालः करालैरिवाम्। खट्वांगाभिहतारि वर्गनिघ पां निघतादिचंयाडु सानित्यंमक्तवरदाननिरितं श्रीकालिकायै नमः। ४। यश्यांपठते नित्यंवेदश्लोकी च वेदवत्विद्यांतार्थंप्रपद्यं तत्कविर्भवति निश्चितम्। अष्टम्यां च चतुर्दश्यां संक्रांतौ-ग्रहणेषु च भौमवारेप ठेद्यस्तु जिवनमुक्तिनशंसयः इदं रहस्य परमं गोपनीयंप्रयत्नतः देवंशिष्याय भक्ताय नाभक्ताय कदाचनः। इति गुडाचारचंद्रोदये घोर का-लिकाचतुःश्लोकी तवे द्गुराजसमाप्तं।

——

अघोरकवच

ॐ श्रीगणेशायनमः ।। ॐ अस्यश्रीअघोरमहामंत्रस्य अघोर ऋषि रन्नुष्टुप्छंदः अघोर रुद्रोदेवताह्लीं बीजं हुं शक्तिः अघोर रुद्रप्रशाद सिध्यर्थे जपे विनियोगः । ॐह्लींस्फुरस्फुरअंगुष्टाभ्यां नमःहृदयायनमःप्रस्फुरप्रस्फुरतर्जनीभ्यां नमःशिरसेस्वाहाः घोरघोरतरतनुरुपमध्यमाभ्यांनमः शिखायैवखट् चट चटप्रचट प्रचट अनामिकाभ्यांनमः कवचायहुं कहकहवल वलकनिष्टिकाभ्यांनमः नेत्रत्रया वौखट् वंध बन्व घातय घातय हुंफट्स्वाहा कर्तलकर पृष्टाभ्यांनमः अस्त्रायफट् इति करानिहृदयादिचा अथध्यानं कालाभ्राम: कराग्रैपरशु डमरुकोखङ्गखेटो च वाणेष्वाग्रशूलं कपालंदधतम भयदो-भीषणास्यंत्रिनेत्रः रक्ताकारांवरोहिप्रवरघटितगात्रो रीनागान्तम...स्वातांतष्टा-र्थदायिन्भवदवननिभं चिंतयेत् पादघोरःइतिध्यात्वा ॐरंअंह्लीं हंक्षःस्फुरस्फुर प्रस्फुर प्रस्फुर घोरघोरतरतनुरुप चटचटप्रचट प्रचटकहकह वल वल वंध वंध घातय घातय हुंफुट्स्वाहा इति मूलमंत्रंजपेत् इतिअघोरन्यासध्यानं ॐ श्रीं ह्लीं हूं ह्लंसः रं अं ह्लं ह्लीं ह्लंसः स्फुर स्फुर प्रस्फुर प्रस्फुर घोर लतरतनुरुप प्रचट प्रचट प्रचट प्रचट कह कह वल वल वंध वध घातय घातय हुं फट्स्वाहा सः हं ह्लूं ह्लीं श्रीं ॐ स्वाहा फट् फट् हुं यत घातय घातय वंध वंध लष लष हक हक टचप्र टचप्र टंचरेतरघोरघोंपरु नुत नुत स्फुर प्र प्र रस्फुप्रसः हं ह्लीं ह्लूं अं रं सः हं हुं ह्लीं श्रीं ॐ इति ईष्ट देवतामंत्र उत्कीलितं भवतसप्तवारं मंत्रयेत् ॐ श्रीं ह्लीं हुं हं सः ॐसोहं हंसो ॐ सः हं ह्लूं ह्लीं श्रीं ॐ इतिसप्तवार अभिमंत्रयेत् संकलपांदो अथ अघोरमाला मंत्र ॐ ह्लां ह्लीं ह्लूं क्षो क्षु रुंसः स्फुर स्फुर प्रस्फुर प्रस्फुर घोरघोर तर तर तनुरुप चट चट प्रचट प्रचट कह कह वल वल वंव बंध घातय घातय ह्लूं फट् घोर घोर सर्व सर्व चंट चंट प्रचट् प्रचट प्र प्र प्र प्रस्फुर दहनायसो-मसूर्याग्निनित्रिणयन सहस्राष्टभुज जहि चरसंविरधरयुगांताप्तिस्मज्वाला दीप्तत्रियंवका पं पं पं पं घोर घोर ह्लुं ह्लुं । कालरूपाय तुरुतुरु । त्वरितरुद्रायधूम्रधूम्र । हिमाय। हुं । मर्णनागणयिंह्लीं । फट्फट् । कालरुग्रायहों । नादनाद । नन । उ उ । ह्रांह्रां । ह्रीं ह्रीं । घ्रौं घ्रौं । ह्लं ह्लं ह्लं ह्लं ह्लुं ह्लुं । द्रौं द्रौं । क्षों क्षों । क्षां क्षां क्षं क्षं क्षं क्षं क्षौ क्षौ । वभ वभ । वाव वाव । नग नग । हन हन हन हन ख । कुट । त्रास । त्रोटय । भें भें भें भें भों भों भों भों भैरवी भैरवी । भीरु । ह ध घोर । तर तर । टढ टढ मर । मुहु मुहु । रुपाय । घोर घोर प्रकाशाय प्रकाशय । धराय धराय । व्याघ्रचर्मपुरोधानाय क ककक हहशूल वज्रखट्वांग पाशकपाल मुष्टिचक्रदरतोमर परशुर खड्गभिंड़िपाल शंखखेटक टंक शरधरअशिकुंतल मुसल गदाधर क हु क हु ।

वम वम। वातज्वर चंडतीव्रज्वरदृष्ट यक्कृष्णसर्प ज्योति ह्लं ह्लं। ह्लुं ह्लुं। तारुपाय यं यं। उच्चाटनाय फटफट। विद्वेषणाय ह्लां ह्लां। कालाग्निरुद्र भैरवाय टट। धिंडी धिंडी धिंड धिंड र र र र ह्लीं ह्लीं। दह दह। अनंताय अनंताय। शोषय शोषय। घातय घातय। मूलय मूलय। पच पच। भक्षय भक्षय। उन्मूलय उन्मूलय। विद्रावय विद्रावय। उन्मीलय उन्मीलय। मर्दय मर्दय। विद्रावय विद्रावय। धूम्र धूम्र। नियन नियन। नशननाशय। ह्लुं ह्लुं। प्र प्र प्र प्र प्रैं प्रैं प्रैं प्रैं प्रैं प्रैं। हें हें। नहि नहिय। उद्योतय उद्योतय। मारय मारय। ह्लुं फट् ह्लुं फट्। वारय वारय। अभि अभि। ह्लुं ह्लुं। अग्नि हु शर्व शर्व। ह्लीं ह्लीं ह्लीं फट् प्र प्र। ॐ हुं फट् ॐ हुं फट्। ॐ अघोरेभ्यो ह्लां ह्लां घोरघोरतरेभ्यो भूं भूं सर्वेभ्यो ह्लीं ह्लीं सर्वस्य सर्व सर्वेभ्यो ह्लौं ह्लौं नमस्तेस्तु रुद्र रुपेभ्यो मुंच घोराय हुं घोरास्त्राय प्रें प्रें प्रें हु फट् हुं फट् हुं फट् हंस हंस ह्लौं ह्लौं। प्रचंड प्रचंड। क्रोधय क्रोधय। ज्वल ज्वल प्रज्वल प्रज्वल ज्वाला ज्वाला दीप्तिअभिमंत्रवृतिउग्र। अघोरअघोर ग्रस ग्रस वाला वला विजृंभरोषय ह्लं ह्लं महत्कुलकुलं कृत्वामहत्वं प्रविशय आवेशाय आवेशय विलास् विलास हन हन हुंफट् मर्मारिपुष्टरोग गज अश्व रथसैन्यं खातय खातय विदारय विदारय कंपय कंपय लोभय रक्षो भय दह दह दह दह त्रासय त्रासय। तारित तर्जित तर्जित तर्जित। बंधय बंधय। मुंचय मुंचय। स्फुट स्फुट ठं ठं हु फट् हुंफट्। स्वाहा ॐ नमो भगवते अघोर यतस्त्राय सर्वकोटिसम प्रभार्याविक्तदंष्ट्रो कालवदनाय ह्लां ह्लीं ह्लुं ह्लैं ह्लौं ह्लः ब्रह्मरक्षसान् हन हन वज्र दंष्ट्रेण सर्व ज्वरान् नाशय नाशय शोकीनिखंड खंड र र ॐ सर्व ग्रहोन्म दभूतवैतालयक्षकुष्मांड ग्रहान्विध्वंसय विध्वंसय हुं फट् स्वाहा। अथमूलमंत्रः ॐ रं अं ह्लीं हं सः स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तर तर नुरुपतनुरुप चट चट प्रचट प्रचट कह कह वल वल गंध गंध घातय घातय हुं फट् स्वाहा अघोर दिग्बंधनं कुर्यात् चित्रकर्म प्रवक्ष्यामि शृणुसुंदरिसादरं कृतेन येन राजानोवशगानात्रसंशयः १। रिपुणानिग्रहः कार्योराज्ञांविज्ञांतकृतेन तस्मातद्देव कर्तव्यंलोकरक्षार्थमाटरात् २। ध्यानं भीम ट्टहासललनधनिर्भिविधेह्रींविएमुत्रवांति विदधातिरिपोर्दलानिनीलयद्रिकुटसदृसः कविराजतैषरनेटोकु राध्वजकरोवतुमामघोरः ३ ह्लीं ह्लीं हनु हं अघोर रुद्र रौद्ररुपाचटतराट्टहास स्फुट दंड कोशमहावेग संहार निपुणमहासमुद्रवेगविस्फुरदधरोष्टनिरंगं कारधानिरंजितगंभीरस्कंद नागसमा करने आनेक करयंकजाननै दयादारविंदसहस्त्रै भीमतरायुधसोभमानं कंकालभूषण कपालशूलहस्तानेक कोटि द्विषद्गुणैः पुर्वाह्यंबंधयभ्रामयंमोहय अघोररुद्रतनु रुपाग्रेय्यांदिशानेक कोटिस्वाहानाथपरिवारैः स्मरनाभिचारविकारादिक्षद्वारि सिंहान् बंधय भ्रामय मोहय सां शीं शूं सैं शौं शः अघोर प्रचांड दोर्दंडविकटाट्टहासविस्फुर्तिताखिलब्रह्मांडपिंगलाक्ष पिंगल केशोसदष्टामहारौद्राखिलदुष्टविद्रावकस्वकीय महासरदंडेनसमस्तप्रेतगणा-

शनिध्यानदक्षिणां दिशंध भ्रामयमोहयस्फुरदघोरसुगनेक कोटिवैतालपरिवृते नैऋति-
दिशं गंधय भ्रामय मोहय स्रां स्रीं स्रूं स्रैं स्रौं स्रः अघोर स्फुर स्फुर दिवृनेक्षणानेक
जलचरयोगिनिपरिवृनवरुणार्च्यमानपाशविद गंमुंजैव रुणाक्षेणवावारुणींदि-
संगंधय भ्रामय मोहय क्रां क्रीं क्रूं क्रैं क्रौं क्रः अघोर प्रचटादहासविदलित खिनधन्यमहा
शूलवायव्यास्त्रेण खिनदुष्टग्रहान् हन हन वायव्यदिशं गंधय भ्रामय मोहय ट्रां ट्रीं ट्रूं
ट्रैं ट्रौं ट्रः अघोर मोहनास्त्रः स्वरुपानेक कोटिधनाधिकार धिया दाविशैभ्रात्रोणो-
त्तरांदिशंगंधय भ्रामय मोह भ्रां भ्रीं भूं भैं भौं भः लां लीं ले लैं लौं लः अघोर
मोहनं महास्त्रेण ईसानीं दिशंगधय भ्रामय मादय मोहय डां डीं डुं डैं डौं डः अनेक
सहस्र कोटिसिद्धगणपरिवृतः कुन्तिसास्त्रेण ऊर्ध्वादिसंगंधय भ्रामय मोहय सकल केपु क्रों
ह्यों अघोर दिसंगंधय आकाशंगंधय अतल वितला निगंधय तलंगंधय तलातलंगंधय
महातलंगंधय पातालंलोकंगंधय रुद्रलोकंबंधय विस्नुलोकंगंधय सत्यलोकंगंधय
भ्रतुलोकंगंधय पिशाचलोकंगंधय सकललोकंगंधय अखिललोकंगंधय अखिलजी-
वात्मानंगंधय चराचरंगंधय ह्रुं ह्रुं ह्रुं क्रों भुं क्षुं जं तत्तां फट् फट् फट् फट् रुद्रो
दोन्संन्याजायक तोत्रायुधय रिणेकरों शिवाय नमोनमः इतिदिग्बंधन ।

श्रीदेव्युवाच ।

देव देव महादेव सच्चिदानंदशखतः त्वत्तः श्रुतसशेषं तु सर्वेषां कवचं पुरा १।
अघोरेसइदं कवचंवदमे करुणानिधेपरं ।

भैरवोवाच —

साधु साधु महाप्रज्ञेगुह्यागुह्यमिदंशिवे यतत्सम्य ग्विधानेन
साधकानांजयंप्रद २। भूतप्रेतपिशाचादिनिग्रहानुग्रहः क्षयंअपायसम-
रकुष्टादिरोगाणां च निवारणं ३। शांतिवस्वस्यस्तंभनानिविद्वेषोच्चा-
टनवानिचमारण तानिकमाणिसिध्यंतिपटनाछिवेरा दृशंकवचंदेविवत्रशसि ४।
श्रृणुसुंदरी अघोर कवचस्यास्य ऋषिकालाग्निरुद्रकः छन्दोनुं देवीगायं देवता घो-
ररुपधकृध्यान मित्यादिकरांगानांन्य संकुर्याद्धिसेषतः छंदंदेघोरमहेश्वरंरजतपुञ्जा-
भमद्यान्मजायुक्तांभीममहाँसविदलत ब्रह्मांडमाशंमुखांहस्तैःपंचभिरातखेटडमरुंघंटाधनुः
शूलवयैभिदानंरियुकात्रीम दिवीपुवे लपां चंडानलं ७। ॐज्वालाकेशोग्रतः पातु
व युवेगस्तुपृष्टतापिन कीदक्षिणतःश्र्वैवामपार्श्वेमहावलः अघोरेसः शिखांपातु रक्तनभीम-
वेषवान्दंष्ट्राकरालवदनोवदनंमेसदावतुपातु नेत्रेग्निनेत्रोश्रोत्रयुग्मंतु भीषणंनासिके
पातुपंचास्यः कपोलौकालरूपधृक् १०। दशानरतुसुदंष्ट्रोमेजिह्वा
मेलोलजीह्वकः चिबुकं भूतराटपातुउष्टं पातु सदारुणः ११। कंठंपातुसुतंठौमे वा-
हुमूलंपुरांतकः बाहु धिमहाबाहुपातुहस्तेतलेविभुः १२। अंगुल्यग्रार युग्रवेगो नखाग्रा-
न्नरमुंडधृक् हृदयं तुशूली अस्थिभूतसनद्धयं १३। जठरंजटिलः पातु नाभिनागविभू-
षणं गुह्यं भूतगणाधीसो मेढ्यांप्टातुविनूपवान् १४। कटिंपातुवसाधारि उरुकंग

रयोवतु जानुकंथाधरः पातुपादयुग्मंपुरांतकः १५। लुताहिवृश्चिकाभूषोपातुपादतले-
ममः षडाधारांवुजे पातु पिंगलश्मशूमूर्द्धजः १६। सप्तधातुः सदापातुकालप्रवर्त सन्निभः
भीमाद्धहसः पुत्रांश्चदारान् देवारिमर्दनः १७। ऐंद्रीस्फुरद्धयंपातु आग्रेय्या प्रस्फुरद्धयं
घोरघोरतरोयाभ्यं दिशं पातु सदामम तनुनूप चट छं छं नैऋतं दिशि मंजसा १८।
प्रतीचि प्रचट छं छं दिशं पातुसदामम कह द्वयंचवायव्यां कौविय्यां ज्वलयुग्म कं
क १९। ईशान्यां घातय छं छं हं ह्रुं फडो द्वंसदावतु कवचेनहविहीनं यत स्थानं
रक्षत्वघोरराट् २०। यदिदं कवचदिव्यं सर्वरक्षाकरं परं वज्र पंजरकं नाम्ना अभेद्यं
सर्वदैवतै:२१। प्रातः काले जपेन्नित्यं सायाह्ने चार्द्ध रात्रके कवचन्ससर्वांगोजपेन्मंत्र-
मन्मविधि २२। सपदाघोर रूपस्नअघोरस्तस्थ रूपवान् तस्यदर्शणमात्रेणपलायं-
तेमहापदः २३। भूत प्रेतादयंस्तस्य दर्शनायांतिद्धुरतः पयरथं विचिंत्याशुततदर्थं-
भिदंजयेत् २४। ततसिद्धिमवाप्नोति कवचस्यतु भैरगात् अपुत्रोलभतेपुत्रान् दरिद्रो-
लभतेधनं २५। आचंद्रतारकस्थायीतस्यतेज ज्वलंवदे देहांतेऽघोरदेवस्य पद प्राप्नोत्य
संशयं २६। इतिश्री आकाशभैरव कल्पे अघोर कवचं संपूर्ण समाप्तम्॥ शुभम्॥
संबत् १८८१।

——

A LIST OF AGHORA MANUSCRIPTS

अघोर कल्प Tantra Bd. 933. Bikaner 6748 BORI 935 of 1887-91.

अघोर कल्पादि From the Vamakesvara Tantra. Mysore II p. 35.

अघोर कवच From Akasabhairavakalpa RASB VIII B6754.

अघोरकाट्टेरी मन्त्रजप Mantra "Katteri" (Tamil) is the name of a spirit. Adyer II p. 250a.

अघोर चतुर्दशीव्रत dh. SSPC III T. 266.

अघोर तन्त्र Allahabad 188 (105).

अघोर तन्त्रागम Kavindracharya 1551.

अघोरताण्डवमन्त्र MD 15249.

अघोरदिग्बन्ध MD. 5820.

अघोरनरसिंहोच्चाटन मन्त्र MD 5821

अघोरनृसिंहकल्प MD 7730

अघोरनृसिंह मन्त्र MD 16435.

अघोरनृसिंहमालामन्त्र MD 5822.

अघोरनीलकण्ठ मन्त्र T ntra. Taylor I 109.

अघोरपंचांग Tantra Adyar II p. 192a.

अघोरपंचांगस्तोत्र Arsastotra from the Rudrayamal. Adyar I.p.233a.

अघोरपत्रिका Tantra. Damodar.

अघोरवडवानलमन्त्र IO 6096A

अघोरभस्मप्रकरण Saivagama by Nadikesvara. Adyar II p.187 a.

अघोरभस्मस्नान Tantra. Adyar II p. 230a.

अघोरभैरवदंडस्तोत्र Ramsimha 1109.

अघोरमन्त्र Adyar II p. 209b America 1826 MD 5822-23. 15106.

अघोरमन्त्रपूजाविधि From Lingapuran. Ujjain II p. 64.

अघोरमन्त्रसाधनप्रकार From the Rudrayamala IM 8377. IO 6174.

अघोरयंत्र Mantra Adyar II p. 209b.

अघोरयामलतंत्र Tantra. extracts on Kali from; MD6077.

अघोररुद्रमन्त्र MT 264 (32nd).

अघोरवायव्यास्त्रमन्त्र Mantra. Adyar II.p. 230a.

अघोरविद्याप्रकरण From Bharavi (Bhairavi) Tantra BORI 952 of 1884-87.

अघोरविद्यावली a work in Arya metre on several branches of Medicine, with reference to sex in 16 Adhikaras. By Aghora. Br. Mus. 512.

अघोरविधि with Kavach IM 7899.

अघोरवीरनृसिंह Tantra B. IV 252.

अघोरवीरनृसिंह मन्त्र MD 5829.

अघोरवीरभद्रमन्त्र MD 5830.

अघोरवीरभद्रमालामन्त्र Adyar II p, 2o9 b. MD 5832-33.

अघोरवीरभद्रसहस्राक्षमन्त्र IM 8379.

अघोरवीरभद्रस्तोत्रमन्त्र IO 609.

अघोरवीरशरभ सालुवकवच Mantra MD 5834.

अघोरवीरशरभसालुवपक्षिराजमालामन्त्र TD 24108.

अघोरवीरशरभसालुवमन्त्र MD 5836.

अघोरवैष्णवीत्रैलोक्यविजयापराजिताStotra; also called Aparajita stotra from the Visnudharmottara. Dacca 169.

अघोरशरभास्त्र Ramasimha 1423.

अघोरशिवपद्धति by Aghorasivacharya BORI. 337 Poona 337. Same as the Kriyakramadyotika. According to the Sivabhusana, there are 18 Paddhatis by Saiva writers, one of which is Aghorasivacharya's.

अघोरसंहारमन्त्र Adyar II p. 230a

अघोरसहस्राक्ष ीमन्त्र MD 5837.

अघोरसुदर्शनमन्त्र MD 5836.

अघोरसुब्रह्मण्यमन्त्र MD 5839.

अघोरस्तव Stotra MD 10904, MT 2595b.

अघोरानन्दनिर्वाणी Yogakarnika, ametrical compilation in 15 padas of Yoga. Benares edn. 1905.

अघोराष्टक Stotra in 8 stanzas MD 10905.

अघोरास्त्र Mantra AK 958 MD 5840.

अघोरास्त्रमन्त्रविषय TD 17086.

अघोरास्त्रसहस्राक्षरीमन्त्र MD 5846.

अघोरास्त्रानुष्ठानविधि MD 7731.

अघोरेश्वरमन्त्र DM 5847.

अवधूतगीता ascribed to Siva. Bikaner1187.

अवधूतगीता This is Bhagavata XI ch.7 slok 25 to chap. 9 slok 29 L-4047 RASB V 3593.

अवधूतगीता also called Avadhutagrantha or Dattagita or Dattatreyagita or Dattatreyagorakhasamvada or Svatmopadesa or Svatmopadesavidhi (7ch.) (Edn. Gitasamgraha, Poona, 1915.

अवधूतगीता व्याख्या by Tripathin. Text ascribed here to Simhadrikhanda of Padmapurana. Jodhpur, p. 45.

अवधूतगीतासप्तश्लोकी Allahabad 114.

अवधूगीतासार an abridgement in 64 verses of Dattatreya's Avadhutagita (Ptd. Br. Mus. Cat).

अवधूतचर्या From the Sanatkumarasamhita.Trav. Uni. 4482 A.

अवधूतशतक Jain by Digambara. BISM 62.

अवधूतसम्प्रदाय पंचरत्नावली By Sukananda Yogindra IO 5973.

अवधूतस्तोत्र AS p. 13.

अवधूताश्रय लक्षण Harihar Sastri XX, 4.

अवधूताष्टक an. Daeca 142.

„ By Dattatreya. America 3905.

„ By Sankara in Bhujangaprayata metre L 1189.

अवधूतोपनिषद (Samkriti-Dattatreyasamvada) Adyar Up. p. 137.

अवधूतोपनिषद भाष्य by Appayadiksitacharya Mysora I p. 459.

अवधूतोपनिषद विवरण by Upanisadbrahmayogin (Pt. Adyar Library 1929).

Abbreviations

1.	AK	Sanskrit Mss. in Bombay Presidency, ed. by A.V. Kathavate.
2.	AS	Asiatic Society of Bengal, ed. by Hara Prasad Sastri
3.	Adyar	Adyar Library, Madras.
4.	Allahabad	Sanskrit Mss. in the Municipal Museum, Allahabad.
5.	America	Census of Indic manuscripts in USA and Canada.
6.	B	Sanskrit Mss. contained in Kathiavad, Kaccha, Sindha and Khandesh by G. Buhler.
7.	Bd.	Sanskrit manuscripts in Bombay Presidency, ed. by R. G. Bhandarkar.
8.	Bikaner	Anup Sanskrit Library Bikaner.

9. BISM.	Sanskrit Mss. in the Bharatiya Itihasa Samsodhak Mandal, Poona.
10. BORI	Bhandarkar Oriental Research Institute, Poona.
11. Br. Mus.	British Museum, London.
12. Dacca	Dacca University Library, Dacca.
13. Damodar	H.H.Sanskrit School,Kashmir,ed.by Damodar Sastri.
14. IO	Sanskrit Mss. in the India Office Library, London.
15. IM	Indian Museum, now in Asiatic Society, Calcutta.
16. Jodhpur	Archaeological Dept. Jodhpur State, Jodhpur, Rajasthan.
17. Kavindracharya	Kavindracharya Library at Benares.
18. L	Notices of Sanskrit Mss.by R.L. Mitra (A.S.Calcutta)
19. MD	Government Oriental manuscript Library, Madras.
20. MT	Triennial Collectinn of Govt. Oriental Mss. Library, Madrs.
21. Mysore	Sarasvati Bhandaram, H. H. Maharaja of Mysore, ed. by F.Kielhorn.
22. RASB	Govt. Collection of the Royal Asiatic Society of
23. Ram Singh	Raja Ram Singh Library, Srinagar.
	Bengal.
24. SSPC	Sanskrit Sahitya Parisad, Calcutta.
25. TD	Sarasvati Mahal Library,Tanjore, ed. by PPS. Sastri.
26. Taylor	Fort Saint George, ed by W. Taylor, Madras.
27. Trav. Uni.	Travancore University Library, Trivandrum.
28. Ujjain	Oriental Manuscript Library, Ujjain.